शान्तो लवः, प्रणत एव च चन्द्रकेतुः,
कल्याणमस्तु सुतसङ्गमनेन राज्ञः ॥ ७ ॥

इति निष्क्रान्तौ। (थ)

विष्कम्भकः ॥ ० ॥ (द)

तद्गौरवात् तस्य रामस्य महिमातिशयेन स्वतो गुरुत्वावगमात् गौरवितजनवचनातिक्रमस्य अनौचित्यादित्यर्थः समुपसंहृतः साकल्येन निवर्त्तितः सम्प्रहारः युद्धव्यापारो येन स तथोक्तः, लवः शान्तः क्रोधायुधनिक्षेपादिपरित्यागेन प्रकृतिमापन्नः, चन्द्रकेतुश्च प्रणत एव ज्येष्ठतातोऽयमिति मत्वा रामपादमूले पतित एवेत्यर्थः। इदानीं सुतेन लवेन सङ्गमनं सम्मेलनं तेन राज्ञो रामस्य कल्याणं मङ्गलमस्तु, मत्पुत्रोऽयमित्यविदितवृत्तान्तो राम इदानीं 'ममैवायं पुत्र' इति परिचिन्वानः तत्सम्मेलनरूपं मङ्गलं प्राप्नोतु इत्यर्थः।

अत्र चन्द्रकेतुलवयोरुग्रताख्यभावस्य प्रशमः रामविषयकभक्तिभावस्याङ्गमिति समाहितनामाऽलङ्कारः।

"धान्येन धनवानित्यादिवत्" सुतसङ्गमनेनेति अभेदे तृतीया, सुतसङ्गमनस्वरूपं कल्याणमित्यर्थः।

वसन्ततिलका वृत्तम् ॥ ७ ॥

(थ) इतीति। विद्याधरदम्पती समरावलोकनार्थमेव समागतौ, तन्निवृत्तौ तत्रावस्थानप्रयोजनाभावात् निष्क्रान्ताविति बोध्यम्।

(द) विष्केति। मध्यमाभ्यां विद्याधरदम्पतीभ्यां प्रयोजितत्वादयमपि शुद्धो विष्कम्भकः। अत्र वर्त्तमानानां युद्धघटनानां वर्त्तिष्यमाणानाञ्च चन्द्रकेतुलवाभ्यां सह रामस्यालापादीनां निदर्शनं द्रष्टव्यम्। तेन विष्कम्भकलक्षणे "वृत्तवर्त्तिष्यमाणाना" मिति वृत्तपदस्य वर्त्तमानार्थोऽपि मन्तव्य इति भाव्यम्।

ततः प्रविशति रामः लवः प्रणतश्चन्द्रकेतुश्च। (ध)

रामः। पुष्पकादवतरन् (न)

दिनकरकुलचन्द्र! चन्द्रकेतो!
सरभसमेहि दृढं परिष्वजस्व।
तुहिनशकलशीतलैस्तवाङ्गैः
शममुपयातु ममापि चित्तदाहः॥ ८॥

चन्द्र। अभिवादये। (प)(१)

(ध) तत इति। प्रणतः रामाभिवादनाय भूमौ पतितः। चन्द्रकेतुश्च प्रणत इत्यर्थः।

(न) राम इति। पुष्पकात् तदाख्यव्योमयानात् अवतरन् भूमाववरोहन्।

दिनकरेति। दिनकरकुलस्य सूर्यवंशस्य चन्द्र! चन्द्रवदाह्लादक! चन्द्रकेतो! सरभसं सवेगम् एहि ममान्तिकमागच्छ, दृढं निर्भरं परिष्वजस्व आलिङ्ग मामिति शेषः ननु किमर्थमालिङ्गनमित्याह तुहिनेति। तुहिनशकलानीव हिमखण्डानीव शीतलानि तैस्तथोक्तैः तव अङ्गैः वक्षःप्रभृतिभिरवयवैः मम चित्तदाहोऽपि सीताशोक-तदपत्याभावजनितो मनस्तापोऽपि शमं नाशम् उपयातु प्राप्नोतु। भार्यायाः पुत्रप्रयोजनकतया "सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवी" दिति स्मरणात् भ्रातुः पुत्रस्य पुत्रस्थानीयत्वात् तदीयपरष्वा सीताशोकतदपत्याभावजनितो मनस्तापो नश्यत्वेति भावः।

अत्र न केवलं गात्रदाहः अपितु मनस्तापः शममुपयातु इति अर्थान्तरापत्तनादर्थापत्तिरलङ्कारः लुप्तोपमादयं, चन्द्रचन्द्रेति व्यञ्जनानामनेकधा सादृश्यात् छेकानुप्रासश्च, इत्येतेषां मिथोनैरपेक्ष्यात् संसृष्टिः।

"रभसो वेगहर्षयो" रिति विश्वः।

पुष्पिताग्रा वृत्तम्॥ ८॥

(प) चन्द्रेति। अभिवादये भवन्तमिति शेषः।

---

(१) क्वचिदयं पाठो नास्ति।

रामः। उत्थाप्य (१) सखेदास्रं परिष्वज्य। अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य?। (फ)

चन्द्र। कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्य लाभाभ्युदयेन, (२) तद्विज्ञापयामि, मामिव विशेषेण वा मत्तः, शिवेन (३) चक्षुषा पश्यत्वमुं महावीरप्रकाण्डं तातः। (ब)

रामः। लवं निरूप्य। दिष्ट्या अतिगम्भीरमधुरकल्याणाकृतिरयं (४) वयस्थो वत्सस्य। (भ)

(फ) राम इति। उत्थाप्य प्रणतं चन्द्रकेतुमुत्तोल्य। दिव्यास्त्रधरः उत्कृष्टायुधग्राही देहो यस्य तस्य तव अपि नाम कुशलं किमु मङ्गलम्। अथवा तव दिव्यास्त्रधरो यो देहस्तस्य उत्कृष्टायुधशालिनो गात्रस्येत्यर्थः कुशलं विपक्षनिक्षिप्तास्त्रप्रहारेण क्षतच्छेदादिकं न जातं किमु इत्यर्थः। दिव्यास्त्रशालिनो देहक्षतासम्भवसम्भावनैव अधिकेति द्योतनार्थं दिव्यास्त्रधरपदमुपात्तम्।

(ब) चन्द्रेति। अत्यद्भुता अतीवविस्मयावहा, क्रिया युद्धकार्यं यस्य तस्य प्रियं प्रीतिकरं दर्शनम् अवलोकनं यस्य तस्य स्वभावसौम्यमूर्त्तेरित्यर्थः लवस्य लाभः प्राप्तिरेव अभ्युदयः समृद्धिः तेन कुशलम् ईदृशो जनो येन मित्ररूपेण प्राप्तः तदेव कुशलमिति भावः। तत्तस्मात् मम प्रियवयस्यत्वादित्यर्थः। मत्तः मत् पञ्चम्यास्तस्, विशेषेण आधिक्यवता शिवेन शुभानुध्यानप्रीतिविस्फारितेनेत्यर्थः। महावीरप्रकाण्डं प्रशस्तं प्रधानशूरम् अमुं सम्मुखस्थं बालकम्। तातः पितृपर्य्यायो भवान्। ममेयं प्रार्थनेति भावः।

"अस्त्री प्रकाण्डो विटपे तरुस्कन्धप्रशस्तयो" रिति रभसः।

महावीरश्चासौ प्रकाण्डश्चेति सः "प्रशंसावचनैश्च रूढ़ै"रित्यादिना नित्यसमासः। बालकन्तु अर्थप्रदर्शनार्थमुक्तम्।

(भ) राम इति। निरूप्य विशेषेणावलोक्य। अतिगम्भीरा अतीवधीरत्वशालिन

---

(१) उत्थायेति पाठान्तरम्। (२) लवस्य अभ्युदयेनेति पाठान्तरम्। (३) मामिव अविशेषेण मत्तः शिवतरेण इति पाठभेदः। (४) अतिकल्याणाकृतिरयमेतावानेव पाठः क्वापि।

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः,
क्षात्रो धर्म्मः श्रित इव तनुं ब्रह्मकोषस्य (१) गुप्त्यै।
सामर्थ्यानामिव समुदयः, सञ्चयो वा गुणाना-
माविर्भूय स्थित इव जगत्पुण्यनिर्म्माणराशिः ॥ ८ ॥

अप्रधृष्यत्वर्थः, मधुरा प्रियदर्शना, कल्याणी मङ्गलसूचकलक्षणवती आकृतिः मूर्त्तिर्यस्य सः। वत्सस्य तव चन्द्रकेतोः।

अतिगम्भीरत्वादिकं समर्थयति त्रातुमित्यादि। लोकान् भुवनानि त्रातुं भयेभ्यो रक्षितुं कायवान् मूर्त्तिमान् परिणतः शरीरधारी सन्नित्यर्थः अस्त्रवेदः धनुर्वेद इव, तथा ब्रह्म वेद एव कोषः पिण्डीकृतहेमरौप्यं तस्य गुप्त्यै रक्षणाय तनुं श्रितः शरीरमाश्रितः क्षात्रो धर्म्मः क्षत्रियजातिः पराक्रम इव, तथा सामर्थ्यानां विक्रमाणां समुदयो राशिरिव एतेरप्रधृष्यत्वमुक्तम्; तथा गुणानां सौन्दर्य्यविनयादीनां सञ्चयो वा पुञ्ज इव एतेन मधुरत्वमुक्तम्। तथा जगत्सु पुण्यनिर्म्माणानि अनुष्ठितानि पुण्यानि कदमिह्निती भावी द्रव्यवत् प्रकाश्यते इति न्यायात्, तेषां राशिः पुञ्जः आविर्भूय मूर्त्तिमत्तया प्रकाश्य स्थित इव एतेन कल्याणत्वं प्रतिपादितम्। अतएव असाधारणोऽयं बालक इति भावः।

अत्र शब्दात्मको वेदो गुणः, अपरे च क्षात्रधर्म्मादयो गुणपदार्था इति तेषाञ्च परात्मना सम्भावनाकरणात् पञ्चानां भावाभिमानीनां वाच्यानां गुणोत्प्रेक्षाणां परस्पर-नैरपेक्ष्यात् संसृष्टिः, तथा ब्रह्मकोषस्येत्यत्र साधकबाधकप्रमाणाभावादुपमारूपकयोः सन्देहसङ्करः। तथा "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वप्रकाशेन वाशब्दस्य उपमाया एव वाचकत्वनिर्देशात् उत्प्रेक्षाद्योतकत्वाभावेन 'सञ्चयो वा गुणाना'मित्यत्र "एष मूर्त्तो यथा धर्म्मः क्षितिपो रक्षति क्षिति"मिति साहित्यदर्पणो-दाहृतवत् अवाचकत्वदोषः, स च 'सततगुणानामिवौघ' इति पाठेन समाधेयः।
"स्यात् कोषश्च हिरण्यञ्च हेमरूप्ये कृताकृते" इत्यमरः।
मन्दाक्रान्ता वृत्तम् ॥ ८ ॥

---

(१) ब्रह्मघोषस्येति भिन्न पाठः।

लवः । अहो ! पुण्यानुभावदर्शनोऽयं महापुरुषः । (म)

आश्वासस्नेहभक्तीनामेकमालम्बनं महत् । [१]

प्रकृष्टस्येव धर्मस्य प्रसादो मूर्त्तिसञ्चरः ॥ १० ॥

आश्चर्य्यम् । [य]

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघन-

स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रह्वयति माम् ।

(म) लव इति । अहो आश्चर्य्यं । पुण्यं पवित्रं अनुभावदर्शने प्रभावरूपे यस्य सः । "अनुभावः प्रभावेऽपि" इत्यमरः ।

आश्वासेति । आश्वासो दुःखार्त्तानामभयदानपूर्वकमाश्वासजननं स्नेहः प्रणयः भक्तिः पूज्येष्वनुरागः तासाम् एकं मुख्यं महत् विशालम् आलम्बनम् आश्रयः । अस्मिन् महापुरुषे दृष्टे सति आश्वासः स्नेहः भक्तिश्च जायत इत्यर्थः । तथा प्रकृष्टस्य उत्कर्षं गतस्य अतिप्रचुरस्येत्यर्थः धर्मस्य पुण्यस्य मूर्त्या सञ्चरत इति मूर्त्तिसञ्चरः देहधारी प्रसादः निर्मलता इव । प्रचुरतरधर्म्माचरणेन जायमानचित्तप्रसादो मूर्त्तिमाश्रित्य आविर्भूत इवेत्यर्थः ।

अत्र आश्वासादीनामनेकेषामेकत्रावस्थितत्वात् पर्य्यायनामाऽलङ्कारः भावाभिमानिनो आद्या गुणीभूतत्वात् च अनयोः संसृष्टिः ॥ १० ॥

(य) आश्चर्य्यमिति । वक्ष्यमाणं सर्वं विस्मयकरमित्यर्थः ।

तदेवाह विरोध इति । अस्मिन् महापुरुषे दृष्टे अवलोकिते सति विरोधो विवादः झटिति तत्क्षणात् विश्रान्तः विरतः, निर्वृत्या आनन्देन, घनो निविडः रसो रागः प्रसरति उच्छलति, अमुं प्रति आनन्देन सान्द्रीकृतोऽनुरागो वर्त्तत इत्यर्थः, तत् युद्धकालीनम् औद्धत्यं दर्पजनितचाञ्चल्यं क्वापि व्रजति कुत्रापि विलीयते अतो तस्मिन्नेव [illegible] गाना, तथा विनयः अस्मादात्मनो न्यूनत्वज्ञानं मां प्रह्वयति अवनमयति भक्तिनम्रं करोतीत्यर्थः । तथा [illegible] मिव अनिर्वचनीय इत्यर्थः परवान् पराधीनः अस्मि, अमुं दृष्ट्वा नात्मनः प्रभवामीत्यर्थः । यदि वा अथवा हि यस्मात्

---

(१). एकमायतनं महदिति पाठान्तरम् ।

झटित्यस्मिन् दृष्टे किमिव [१] परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥ ११ ॥

रामः । तत् किमेकपद एव दुःखविश्रामं ददाति उपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम् । अथवा स्नेहस्य निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् । [२]

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।

तीर्थानां वाराणस्यादीनामिव महतां महापुरुषाणां कोऽपि अनिर्वचनीय इत्यर्थः महार्घः महामूल्यः दुर्लभः अतिशयः प्रभावातिरेको वर्त्तत इति शेषः । तेनैव विरोधविश्रामादयो जाता इति भावः ।

अत्र रामस्य प्रभावातिशयप्रतिपादनकार्य्यं प्रति विरोधविश्रामादीनामनेकेषां कारणानां निर्द्देशात् समुच्चयोऽलङ्कार उपमा च, ताभ्यां सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः सङ्कीर्य्यते ।

"प्रह्वो नम्र" इत्युणादिकोषः । "गुणे रागे द्रवे रसः" । "परतन्त्रः पराधीनः परवान् नाथवानपि ।" "मूल्ये पूजाविधावर्घः" इति चामरः ।

शिखरिणी वृत्तम् ॥ ११ ॥

(२) राम इति । तत्किमित्येकमव्ययं प्रश्नार्थे । एकपद एव युगपदेव न पुनरेकस्मिन् काले दुःखनाशः, सद्व्यवहारादिना बहुपरकाले च स्नेह इत्येवमच्छदार्थः । दुःखविश्रामं सीताशोकतदपत्याभावजनितदुःखस्य नाशम् । तथा कुतोऽपि निर्वक्तुमशक्यादित्यर्थः निमित्तात् कारणात् अन्तरात्मानम् अन्तःकरणम् उपस्नेहयति स्नेहार्द्रं करोति एष बालक इति शेषः । ननु सति कारणे तत् निर्वक्तुं योग्यमेव स्यादिति कथं तत् निर्वक्तुमशक्यमित्याह अथवेति । चकारः समुच्चये अन्यपदार्थवत् स्नेहयत्यर्थः, व्यपेक्षया सह वर्त्तते इति सव्यपेक्षः निमित्तस्य सव्यपेक्षः स्नेहः किमपि निश्चितं कारणमपेक्षते इति यत् लौकिकवाक्यमेतत्, तत् विप्रतिषिद्धं विरुद्धम् असमीचीनमित्यर्थः । किमपि बहिर्भिन्नं नियतं

---

(१) किमपीति पाठान्तरम् ।

विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ १२ ॥

लवः । चन्द्रकेतो ! क एते ? । (ल)

चन्द्र । प्रियवयस्य ! ननु तातपादा एते । [व] [१]

लवः । ममापि तर्हि धर्मतस्तथैव, यतः प्रियवयस्य इत्यात्थ, किन्तु चत्वारः खलु भवतामिव व्यपदेशभागिनस्तत्रभवन्तो रामायणकथापुरुषाः तद्विशेषं ब्रूहि । [श]

कारणं विनाऽपि स्नेहो जायते, वर्त्तमानमेव तन्निदर्शनमिति भावः ।

"तत् स्वर्णकपर्दे तुल्ये सद्यः सपदि च स्मृते" इति हलायुधः ।

उक्तार्थमेव दृढीकरोति व्यतिषजतीति । आन्तरः अन्तःकरणवर्त्ती कोऽपि निर्देष्टुमशक्यः हेतुः कारणं पदार्थान् वस्तूनि व्यतिषजति परस्परं सम्मीलयति, किन्तु प्रीतयः स्नेहाः बहिरुपाधीन् बाह्यविशेषणानि पुत्रत्वभ्रातृत्वादिरूपं विदित-कारणानीत्यर्थः न खलु संश्रयन्ते न खलु उत्पादकत्वेनापेक्षन्ते । हि यस्मात् पुण्डरीकं पद्मं कर्तृ पतङ्गस्य सूर्यस्य उदये सति विकसति स्फुटति, किञ्चेति चार्थः चन्द्रकान्तः स्वनामप्रसिद्धो मणिविशेषः हिमरश्मौ चन्द्रे उद्गते उदिते सति द्रवति निष्यन्दते जललवं क्षरतीत्यर्थः । अतः कमपि सम्पर्कं विनैव अस्मिन् बालके मम स्नेहो भवितुमर्हत्येवेति भावः ।

अत्र विशेषद्वयेन सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ।

"उपाधिर्धर्मचिन्तायां कुटुम्बव्यापृते छले । विशेषणे पुंसि" इति मेदिनी ।
मालिनी वृत्तम् ॥ १२ ॥

(ल) लव इति । क एत इति गुरुत्वाद्बहुवचनम् ।

(व) चन्द्रेति । भक्त्यतिशयप्रकाशरूपप्रयोजनद्योतनाय पादशब्दस्य ताते तद्रूपा, धर्मविभक्तिभाजनरूपाः ताता इत्यर्थः ।

(श) लव इति । तर्हि तव तातपादत्वे सति, ममापि न केवलं तव

चन्द्र । ननु ज्येष्ठतातपादा इत्यवेहि । [ष]

लवः । सोल्लासम् । कथं रघुनाथ एव, [१] दिष्ट्या सुप्रभातमद्य, यदयं देवो दृष्टः । सविनयकौतुकं निर्वर्ण्य । तात ! प्राचेतसान्तेवासी लवोऽभिवादयते । [स]

रामः । सस्नेहम् । एह्येहि एह्येहि । सस्नेहं परिष्वज्य । अयि वत्स ! कृतं कृतमतिविनयेन, अनेकवारमपरिश्लथं परिष्वजस्व । [ह]

धर्मतः आचारात् लौकिकव्यवहारादित्यर्थः, तथैव तातपादा एव नत्वन्यविधसम्बन्धशालिन इत्येवशब्दार्थः । लोके हि वयस्यः स्वसमानपर्याय इति मन्यते, ततश्च वयस्यस्य यो यादृशः सम्बन्धी स्वस्यापि स तादृश एव सम्बन्धीति व्यवहारोऽस्तीति भावः । आत्थ ब्रवीषि । एवं व्यपदेशं तातपादेति संज्ञां भजन्त इति एवंव्यपदेशभागिनः तातपादपदवाच्या इत्यर्थः । रामायणमेव कथा उपाख्यानं तस्याः पुरुषाः पात्राणि प्राधान्येन वर्णनीया इत्यर्थः । तत्तस्मात् सामान्येन उक्त्या विशेषनिर्णयासम्भवादित्यर्थः, विशेषं तेषां चतुर्णां मध्ये कतमोऽयमिति इतरव्यावर्त्तकं नाम ब्रूहीत्यर्थः । 'धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः" इत्यमरः ।

(ष) चन्द्रेति । नन्विति सम्बोधने । अवेहि जानीहि ।

(स) लव इति । सोल्लासं सानन्दम् । कथमिति हर्षद्योतकमव्ययं शब्दकल्पद्रुमे द्रष्टव्यम् । रघुनाथो राम एव, न खलु ततो न्यूनमहिम्नां भरतादीनां कश्चिदित्येवशब्दार्थः । अद्य सुप्रभातं शोभनं दिनमुखम् । 'सद्भिः सन्निकर्षो हि धन्यानामपि श्रूयते" इति स्मरणादिति भावः । प्राचेतसान्तेवासी वाल्मीकिशिष्यः । अभिवादयते भवन्तं प्रणमति ।

(ह) राम इति । एह्येहीति कृतं कृतमिति च आदरे द्विरुक्तिः । अयीति

---

(१) कथं रघुनाथः । कथं रघुनाथ एषः । इति पाठान्तरद्वयम् ।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः ।
नन्दयति चन्द्रचन्दननिष्यन्दजड़स्तव स्पर्शः ॥१३॥

लवः । स्वगतम् । ईदृशो मां [१] प्रत्यमीषामकारणस्नेहः मया पुनरेभ्य एवाभिद्रुग्धमज्ञेन, यदायुधपरिग्रहं यावदध्यारूढो दुर्योगः । प्रकाशम् । मृष्यन्त्विदानीं लवस्य बालिशतां तातपादाः । [क]

स्नेहसम्बोधने । कृतमिति करणार्थमव्ययम् । अतिविनयेन भूतलपतनरूपेण नितान्तविनयप्रकाशेन, वचसैव तव विनयप्राचुर्य्यप्रकाशादिति भावः । अपरिश्लथम् अशिथिलं, गाढ़मित्यर्थः, परिष्वजस्व आलिङ्ग ।

कथमयं परिष्वङ्गानुरोध इत्याह परिणतेति । परिणतं परिपक्वं सावशेषपरिप्रातमित्यर्थः अतएव कठोरं पूर्णावयवं यत् पुष्करं पद्मं तस्य गर्भच्छदः अभ्यन्तरदलं तदत् पीनमसृणः अत्यन्तश्लक्ष्णः, सुकुमारः कोमलश्चेति स तथोक्तः, तथा चन्द्रश्च चन्दननिष्यन्दश्च चन्दचन्दननिष्यन्दौ ताविव जड़ः शीतलः, चन्द्रवत् चन्दननिर्य्यासवच्च शीतल इत्यर्थः तव स्पर्शः त्वगिन्द्रियग्राह्यो गुणविशेषः मां नन्दयति सुखीकरोति । अतएवानेकवारपरिष्वङ्गानुरोध इति भावः ।

अत्र लुप्तोपमाद्वयस्य मिथोनैरपेक्ष्यात् संसृष्टिः परार्द्धे छेकानुप्रासश्च ।

"सुषीमः शिशिरो जड़" इत्यमरः । मसृणत्वे पुष्करगर्भच्छदसम्पर्कसाम्यप्रयोजनप्रतिपादनाय पीनशब्दस्य अत्यन्तार्थे लक्षणा ।

आर्य्या जातिः ॥१३॥

(क) लव इति । अमीषां रघुनाथादीनां । ईदृशः सातिशय इत्यर्थः । अकारणस्नेहः कश्चिदपि सम्यक् रूपं हेतुं विनापि जात स्नेह इत्यर्थः । पुनः किन्तु अज्ञेन आत्मीयानात्मीयभेदज्ञानशून्येन मया । अयोगव्यवच्छेदने एवशब्दः । अभिद्रुग्धं द्रोहः कृतः हिंसा समाचरितेत्यर्थः यत् यस्मात् हेतोः दुर्योगो दुरभिसन्धिः हिंसया कलुषिता चित्तवृत्तिरित्यर्थः आयुधपरिग्रहं यवत् हननाय अस्त्रधारणपर्यन्तं

(१) अस्माद्दृशानिति पाठान्तरम् ।

रामः। किमपराद्धं वत्सेन ?। [ख]

चन्द्रः। अस्त्रानुयात्रिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरायितमनेन। [ग]

रामः। नन्वयमलङ्कारः क्षत्रस्य। [घ]

न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते [१]
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः।

अध्यारूढः समारूढः अतीयस्य हकारिणं चन्द्रकेतुमेव हन्तुं शस्त्रं धृतमित्यर्थः। बालिशतां मूर्खतामयुक्तसंग्रामकरणापराधं मृष्यन्तु स्वगुणेन क्षमन्ताम्। ईदृशदुष्कार्यकरणेन नितान्तलज्जितोऽस्मीति भावः।

• अभिद्रुग्धमिति भावे क्तः। एभ्य इति तादर्थ्यविवक्षया चतुर्थी।

(ख) राम इति। वत्सेन स्नेहभाजनेन त्वया, किमपराद्धं कोऽपराधः कृतः, यमहं मृष्यामीति भावः।

(ग) लज्जया वक्तुमसमर्थं लवमवलोक्य चन्द्रकेतुरेव रामोक्तेरुत्तरं ददाति चन्द्रेति। अस्त्रानुयात्रिकेभ्यः अश्वमेधाश्वनिर्वीयाश्वानुचरेभ्यः, तातस्य भवतः प्रतापाविष्करणं प्रभावप्रकाशम् उपश्रुत्य निशम्य अनेन कुमारेण वीरायितं वीरवदाचरितं युद्धं कृतमित्यर्थः। कुमारोऽयं इममेवापराधं मन्यते इति भावः।

(घ) राम इति। अवधारणे ननुशब्दः। अयं वीरसमाचारः क्षत्रस्य क्षत्रियस्य अलङ्कारो ननु, भूषणमेवेत्यर्थः न तु दूषणमित्यभिप्रायः। मौर्वीमेखलादिदर्शनात् रामेण लवस्य क्षत्रियत्वमनुमितमिति बोध्यम्।

वीरवदाचरणस्य भूषणत्वं प्रतिपादयति न तेज इति। तेजस्वी महाप्रभावशाली जनः, प्रसृतं विस्तीर्णं अपरेषां आत्मभिन्नानां तेजः प्रभावं न प्रसहते न क्षमते, सः असहनमित्यर्थः प्रश्नीस्वमानलिङ्गत्वात् पुंस्त्वम्, प्रकृतिनियतत्वात् स्वभावनिबन्धितत्वात् अकृतकः अकृत्रिमः स्वो भावः स्वकीयो धर्मः। तथाच यदि देवो दिनकरः सूर्यः मयूखैः करैः

---

(१) विषहते इति पाठान्तरम्।

मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति ॥१४॥

अश्रान्तं सततं तपति सन्तापं करोति आग्नेयग्रावाणमित्यर्थात् तदा आग्नेयग्रावा अग्न्युत्पादकप्रस्तरविशेषः सूर्यकान्तमणिरिति यावत् निकृत इव अवमानित इव सन् किं कथं केन हेतुनेत्यर्थः तेजांसि अग्नीन् वमति उद्गिरति निःसारयतीत्यर्थः, रविकरसन्ताप एव तत्र हेतुरित्यर्थः। अत एवात्र प्रतापप्रकाशी लवस्य वीरत्वप्रकाशो वीरस्वभावसिद्धत्वात् महापुरुषकारप्रकाशकत्वाच्च अलङ्कार एव, सुतरामत्र अपराधाभावात् क्षमायाः प्रयोजनन्तु नास्त्येव प्रत्युत लवं प्रति सुमहान् सन्तोष एव मे जात इति भावः।

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः निकृत इवेत्युपमया सङ्कीर्णः; तथा 'स तस्य स्वो भाव' इत्यर्थान्तरन्यासोक्तावेव निर्वाहे 'प्रकृतिनियतत्वादकृतक' इत्यंशोपादानात् 'सहसा विदधीत न क्रिया' मित्यादिसाहित्यदर्पणोदाहृतवत् अर्थगतपुनरुक्ततादोषः, स च 'जगति तदिदं सर्वं विदित'मितिवत् केनापि पाठेन समाधेयः। अल्पमात्ररविकरस्पर्शे सूर्यकान्तमणेरग्न्युत्पत्तेरभावात् बहुतररविकरस्पर्श एव तस्मादग्न्युत्पत्तिर्भवतीति प्रदर्शनार्थं स अश्रान्तपदमुपात्तमिति भाव्यम्। किन्त्वत्र वमतेर्गौणप्रयोगात् न ग्राम्यत्वदोषः अपितु गुण एव, तथा च काव्यादर्शे 'निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते।'

'पाषाणप्रस्तरग्रावोपलाश्मानः।' इत्यमरः।

एतदनुरूपो भावो यथा शाकुन्तले—

'शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति ॥'

भारवावपि 'किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥'

शिखरिणी वृत्तम् ॥१४॥

चन्द्र । तात ! अमर्षोऽप्यस्य शोभते वीरस्य, पश्यतु हि तातः, प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सर्वतः सैन्यानि । [ङ]

रामः । विलोक्य । वत्स ! लव ! संह्रियन्तामस्त्राणि, त्वमपि चन्द्रकेतो ! निर्व्यापारविलक्षाणि[१]सान्त्वय बलानि । [च]

लवः । यथाज्ञापयति तातः । इति प्रणिधानं नाटयति । (छ)

चन्द्रः । यथादिष्टम् । इति निष्क्रान्तः (ज)

(ङ) चन्द्रेति । अमर्षः असहिष्णुता । शोभते युज्यते इत्यर्थः । न केवलम् अस्य विनयसौजन्यादिगुणः शोभते अपितु असहिष्णुत्वेऽपि अमर्षः शोभते इत्यपेरर्थः । हि यस्मात् । प्रियवयस्येन त्वयेन विनियुक्तं निक्षिप्तं यत् जृम्भकास्त्रं तेन निष्कम्पं निष्पन्दं यथा स्यात्तथा स्तम्भितानि जडीकृतानि सर्वतः सर्वासु दिक्षु सैन्यानि बलानि अतएव ईदृशमहाप्रभावशालिनो महावीरस्य परप्रभावासहिष्णुता यत् शोभते तत्र न कोऽपि प्रतिवादोऽस्तीति भावः ।

(च) राम इति । विलोक्य सैन्यानीति शेषः । संह्रियन्ताम् उपसंह्रियन्तां संह्रियन्तामिति यावत् । निर्व्यापाराणि समरकार्य्ये सामर्थ्याभावादुद्यमाभावेन विलक्षाणि 'एकेन' बालकेन शिशुना सर्वे वयं योद्धारः स्पन्दनहीनीकृता" इत्यवमाश्चर्य्यान्वितानि बलानि अस्मत्सैन्यानि सान्त्वय प्रियवाक्येन समाश्वासय ।

'विलक्षो विस्मयान्विते" इत्यमरः ।

(छ) लव इति । यथाज्ञापयति, तथा करवाणीति वाक्यशेषः अस्त्राण्युपसंहरामीत्यर्थः । प्रणिधानम् अस्त्रोपसंहारार्थं समाधिं ध्यानमिति यावत् नाटयति नयनमुद्रणादिना अभिनयति ।

(ज) चन्द्रेति । यथादिष्टं भवतेति शेषः, तथा करवाणीत्यर्थः ।

(१) विलक्षितानीति पाठान्तरम् ।

लवः। प्रशान्तमस्त्रम्। (झ)

रामः। वत्स! सरहस्यप्रयोगसंहरणान्यस्त्राण्याम्नायवन्ति। [ञ]

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्राः शरदस्तपांसि।
एतान्यपश्यन् गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥१५॥

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कृशाश्वः परःसहस्रपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच, स तु भगवान् मह्यमित्येष गुरुपूर्वानुक्रमः। [१] कुमारस्य तु कुतः [२] सम्प्रदाय इति पृच्छामि। [ट]

(झ) लव इति। अस्त्रं मदीयजृम्भकास्त्रं प्रशान्तम् उपरतं निष्क्रियं जातमित्यर्थः।

(ञ) राम इति। रहस्यं गोपनीयं मन्त्र इत्यर्थः। रहस्येन सह वर्त्तमाने सरहस्ये प्रयोगसंहरणे निक्षेपोपसंहारौ येषां तानि तथोक्तानि अस्त्राणि एतानि जृम्भकास्त्राणि आम्नायवन्ति गुरूपदेशसापेक्षाणीत्यर्थः।

'रहस्यम्। गोपनीयम्।' 'आम्नायः।···गुरुपरम्परोपदेशः' इति च शब्दकल्पद्रुमः।

आम्नायो विद्यते येषां तानि आम्नायवन्ति, तदस्त्वेव जन्यतासम्बन्धेनेति बोध्यम्। गुरूपदेशसापेक्षत्वं प्रतिपादयति ब्रह्मादय इत्यादिना गद्यांशान्तेन। प्रथमाङ्के चित्रदर्शनवेलायामपि रामेणायं श्लोकः पठितः। तत्रैव व्याख्यातः ॥१५॥

(ट) अथैतदिति। अथ ब्रह्मादीनां दर्शनानन्तरं कृशाश्वस्तदाख्यः कश्चित् मुनिः एतेषां जृम्भकास्त्राणां मन्त्राणां पारस्य शेषपर्य्यन्तस्य अयनं गमनं ज्ञानमिति यावत्,

---

(१) इत्येष क्रमः, इत्येष पूर्वानुक्रम इति पाठभेदौ। (२) क्व इति क्वापि पाठः।

लवः । स्वतःप्रकाशान्यावयोरस्त्राणि । [ठ]

रामः । विचिन्त्य । किं न सम्भाव्यते [१] प्रकृष्टपुण्यपरिपाकोपादानः कोऽपि महिमा स्यात्, द्विवचनन्तु कथम् । [ड]

लवः । भ्रातरावावां यमजौ । [ढ]

रामः । स तर्हि द्वितीयः कः [२] । [ण]

तत् मन्त्रपारायणमेव उपनिषत् गूढविद्या ताम् । सहस्रात् परे इति परःसहस्राः सहस्राधिका इत्यर्थः ये परिवत्सराः संवत्सराः तान् व्याप्य अन्ते समीपे वसतीति तथा सहस्रवत्सरान् यावत् छात्रभावापन्नायेत्यर्थः कौशिकाय कुशिकवंश्याय । स तु भगवान् विश्वामित्रः मह्यं प्रोवाच इत्यन्वयः, गुरुणां उपदिष्टानां पूर्वः पूर्वकालवर्त्ती, अनुक्रमः उपदेशपरम्परा कुमारस्य तव कुतः कस्मात् आद्यगुरोः सकाशात् सम्प्रदायः उपदेशपरम्परा ।

(ठ) लव इति । स्वतः स्वयमेव उपदेशं विनेवेत्यर्थः प्रकाशः आविर्भावो येषां तानि । अस्त्राणि जृम्भकास्त्राणि ।

(ड) राम इति । विचिन्त्य किञ्चिद्विविच्येत्यर्थः । किं न सम्भाव्यते जगतीति शेषः । प्रकृष्टम् अत्यन्तं यत् पुण्यं पूर्वजन्मार्जितो धर्मः, तस्य परिपाकः फलजननोन्मुखीभावः स एव उपादानं कारणं यस्य स तथोक्तः, महिमा माहात्म्यं स्यात् भवेत्, पूर्वजन्मार्जितात् कस्माचित् महापुण्यात् स्वयमेव जृम्भकास्त्राणामाविर्भावो भवेदित्यर्थः । तु किन्तु द्विवचनम् आवयोरिति षष्ठीद्विवचनप्रयोगः कथम्, एकस्मिन्नर्थे एकवचनस्यैवानुशासनादिति भावः ।

(ढ) लव इति । यमजौ युगपदेकगर्भजातौ । अतएव द्वयोरर्थयोर्द्विवचनप्रयोगः कृत इति भावः ।

(ण) राम इति । तर्हि युवयोर्द्वित्वे सतीत्यर्थः ।

---

(१) क्वापि पाठोऽयं नास्ति । (२) क इति पाठान्तरम् ।

नेपथ्ये । भाण्डायन ! भाण्डायन ! [त]

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ ? सखे ! तथेति ।
अद्यास्तमेतु भुवनेष्वधिराजशब्दः
क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥१६॥

रामः । अथ कोऽयमिन्द्रमणिमेचकच्छवि-
र्ध्वनिनैव दत्तपुलकं करोति माम् ।

(त) नेपथ्य इति । भाण्डायनो नाम कश्चित् मुनिशिष्यः, सतु चतुर्थाङ्कविष्कम्भके परिचितः ।

आयुष्मत इति । आयुष्मतः दीर्घायुःशालिनो लवस्य नरेन्द्रसैन्यैः राज्ञो रामस्य सैनिकैः सह आयोधनं युद्धं, प्रवृत्तमिति शेषः, इति ननु, किं आत्थ ब्रवीषि ? इति कुशस्य जिज्ञासा । सखे ! वत्सो ! कुश ! तथा सत्यं, नरेन्द्रसैन्यैः सह लवस्य युद्धं प्रवृत्तमेवेत्यर्थः । इति भाण्डायनस्योत्तरम् । तदा अद्य भुवनेषु अधिराजशब्दः प्रधानो राजा इति शब्दः अस्तं लोपम् एतु प्राप्नोतु । अद्य मदीयसमरकर्म्मणा न केवलं अधिराजस्य रामस्य विनाशो भवेत्, अपि तु अधिराजशब्दस्यापि चिराय विलोपो भवेदिति भावः । तथा अद्य क्षत्रस्य क्षत्रियजातेः शस्त्राण्येव शिखिनो वह्नयस्ते शस्त्रशिखिनः शमं निर्वाणं यान्तु प्राप्नुवन्तु । अद्य क्षत्रियजातेरपि शस्त्राग्निनिर्वाणं मया विधेयमिति भावः । इति भाण्डायनमुखात् युद्धवार्त्तां सत्यामवगम्य कुशस्य सदर्पोक्तिरिदम् ।

अत्र शस्त्रशिखिन इति निरङ्गं केवलरूपकमलङ्कारः ।

किलेति लोकवार्त्तायां, ननुकिमित्येकमव्ययं प्रश्ने ।

वसन्ततिलका वृत्तम् ॥१६॥

अथेति । अथेति प्रश्नबोधकम् । इन्द्रमणिर्नीलकान्तमणिः तस्येव मेचका श्यामा छविः कान्तिर्यस्य, स इन्द्रमणिमेचकच्छविः, कोऽयं बालकः ध्वनिना कण्ठस्वरेणैव ननु सन्निधानेन आलिङ्गनादिना इत्येवशब्दार्थः, दत्ताः पुलका रोमाञ्चा यस्य

नवनीलनीरधर-धीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम् ॥ १७ ॥

लवः। अयमसौ मम ज्यायानार्यः कुशो नाम भरताश्रमात् प्रतिनिवृत्तः। (थ)

रामः। सकौतुकम्। वत्स! इत एवाह्वयैनमप्यायुष्मन्तम्। (द)

लवः। एवम्। इति परिक्रामति। (ध)

ततः प्रविशति कुशः।

कुशः। साकूतहर्षधैर्यं धनुरास्फालयन्। (न)

तं दत्तपुलकम्, आनन्दातिरेकादुत्पादितरोमाञ्चमित्यर्थः माम्, नवस्य नवीनस्य सद्यः समुद्गतजलस्येत्यर्थः अतएव नीलस्य श्यामलस्य नीरधरस्य मेघस्य धीरगर्जितक्षणे गम्भीरगर्जनसमये वर्षाकाले इत्यर्थः बद्धानि धृतानि कुड्मलानि मुकुलानि येन तस्य कदम्बस्य नीपवृक्षस्य डम्बरः तुलना यत्र तं तथोक्तं करोति। मेघेन सह कुशस्य, तद्गर्जितेन सह कुशकण्ठस्वरस्य, कदम्बवृक्षेण सह रामस्य, कदम्बमुकुलैः सह च रामरोमाञ्चानां सादृश्यं बोध्यम्।

अत्र द्वयोरुपमयोर्मिथोनिरपेक्षत्वात् संसृष्टिः। परार्द्धे वृत्त्यनुप्रासच्छेकानुप्रासयोरेकाश्रयानुप्रवेशरूपः सङ्करश्च।

"कालश्यामलमेचकाः।" "निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः" इति चामरः।

मञ्जुभाषिणी वृत्तम् ॥ १७ ॥

(थ) लव इति। अत्र तच्छब्दसमानार्थकोऽदःशब्दः, तेन अयं दृश्यमानः, असौ सः, पूर्वमावेदित इत्यर्थः। ज्यायान् ज्येष्ठः अग्रज इति यावत्।

(द) राम इति। इत एव अस्मिन्नेव स्थाने, ममान्तिक एवेत्यर्थः।

(ध) लव इति। एवमित्यङ्गीकारार्थमव्ययम्। परिक्रामति कुशमाह्वातुं पादक्षेपं करोति।

(न) कुश इति। एकाकिना बालकेन लवेन निहतासंख्यसैन्यदर्शनादद्भुतम्

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनो-
र्दृप्तानां दहनाय (१) दीपितनिजक्षत्रप्रतापाग्निभिः।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
दीप्तास्त्र(२)स्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥१८॥

मयापीदानीं योद्धव्यमिति युद्धसम्भवात् वीरस्वभावसुलभो हर्षः, स्वाभाविकञ्च धैर्यम् अव्ययता, तैः सहेति तथोक्तम्। आस्फालयन् आन्दोलनपूर्वकमाकर्षन्।

दत्तेन्द्राभयेति। भगवतो महाप्रभावान्वितात्, विवस्वतः सूर्यस्यापत्यमिति वैवस्वतः तस्मात् मनोः आ, वैवस्वतमनोरधिकारसमयमारभ्येत्यर्थः दत्ता इन्द्राय अभयदक्षिणा असुरसंहारेण अभयदानं यैस्तथोक्तैः, तथा दृप्तानाम् दर्पान्वितानां अरीणां दहनाय शोषाय अवनतभावमनापन्नानां उन्मूलनायेत्यर्थः दीपितः सन्धुक्षितः निजः स्वकीयः क्षत्रप्रतापः क्षत्रियप्रभावः एव अग्निर्यैः तथोक्तैः, आदित्यैः सूर्यवंशीयैः नृपतिभिः राजभिः सह इत्यर्थः यदि विग्रहो युद्धं भवेदित्यर्थः ततस्तर्हि, दीप्तानाम् उज्ज्वलानाम् अस्त्राणामायुधानां स्फुरन्तीभिः समन्तात् प्रसरन्तीभिः, उग्राभिर्भयानकाभिः, दीधितिशिखाभिः रश्मिज्वालाभिः नीराजिता निर्मञ्छिता कृतारत्रिका इति यावत् ज्या गुणो यस्य तत्, दीपमालया नीराजनसमये यथा तदीयरश्मिज्वालाभिः देवताप्रतिमा समुज्ज्वला स्यात् तथा निशितानामस्त्राणां रश्मिज्वालाभिः यस्य धनुषो मौर्वी समुज्ज्वला, तदित्यर्थः, एतत् मम धनुः कार्मुकं धन्यं श्लाघार्हं। महाधनुरिदं महावीरेषु व्यापारितं सत् चरितार्थमेव भवेदिति महानेव ममानन्द इति भावः।

अत्र क्षत्रप्रतापाग्निभिरित्यत्र निरङ्गं केवलरूपकमलङ्कारः। तथा दीधितिशिखायां दीपमालात्वारोपः ज्यायां देवताप्रतिमात्वारोपश्च नीराजितपदप्रकाश्यौ व्यङ्ग्य इति वस्तुना रूपकालङ्कारध्वनिः।

नीराजनम् आरात्रिकमिति साम्प्रदायिकाः।

शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

---

(१) दुष्टानां दमनायेति पाठान्तरम्। (२) दिव्यास्त्रेति पाठभेदः।

विकटं परिक्रामति। (प)

रामः। कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिरेकः। (फ)

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव॥ १९॥

लवः। उपसृत्य। जयत्वार्य्यः।

(प) विकटमिति। विकटं दर्पोद्धतं यथा स्यात्तथा परिक्रामति पादक्षेपं करोति।

(फ) राम इति। अस्मिन् दृश्यमाने नवागते, क्षत्रियपोतके क्षत्रियबालके कोऽपि अनिर्वचनीयः, पौरुषस्य पुरुषकारस्य महावीरत्वस्येत्यर्थः अतिरेकः अतिशयः विद्यत इति शेषः।

पौरुषातिरेकं प्रतिपादयति दृष्टिरिति। दृष्टिः अस्य कुमारस्य दृष्टिपातः तृणीकृतः तृणवदतितुच्छतया गणितः जगत्त्रयस्य त्रिभुवनस्य सत्त्वानां प्राणिनां सारो बलं यया सा तथोक्ता, असौ बालकः दृष्टिपातभङ्ग्या सर्वेषामेव त्रिभुवनवासिनां प्राणिनां बलं तुच्छमिव मन्यते इति प्रतीयत इत्यर्थः। धीरा सधैर्य्या अव्याकुलेति यावत् उद्धता सावष्टम्भा सदर्पेत्यर्थः गतिः अस्य पादक्षेपः धरित्रीं भूमिं नमयतीव प्रह्वीकरोतीव। कौमारके शैशवेऽपि वयसि गिरिवत् पर्वत इव गुरुतां गौरवं भारवत्त्वमित्यर्थः दधानो बिभ्रत् अयं बालकः किं किमुत वीरो रसः शरीरधारी वीररसस्य स्थायीभाव उत्साह इत्यर्थः, उत अथवा दर्प एव अन्तःसारजातो मूर्त्तिमानहङ्कार एव एति आगच्छति। असाधारणोऽयं बालक इति भावः।

अत्र प्रथमे चरणे भावाभिमानिनो प्रतीयमाना क्रियोत्प्रेक्षा, द्वितीये भावाभिमानिनो वाच्या क्रियोत्प्रेक्षा, तृतीयपादे तु उत्साहदर्पौ गुणपदार्थाविति गिरिवदित्युपमासङ्कीर्णं भावाभिमानि वाच्यं गुणोत्प्रेक्षाद्वयम्, एतेषां मिथोनिरपेक्षत्वात्

कुशः । नन्वायुष्मन् ! किमियं वार्त्ता युद्धं युद्धमिति (ब)(१)

लवः । यत्किञ्चिदेतत्, दृप्तभाव-(२) मुत्सृज्यार्य्योऽस्मिन् विनयेन वर्त्तताम् । (भ)

कुशः । किमर्थम् ? ।

लवः । एष (३) देवो रघुपतिस्तिष्ठति, स च स्निह्यत्या-वयोरुत्कण्ठते च युष्मत्सन्निकर्षस्य । (म)

संसृष्टिः । किन्त्वत्र वीरोरस इत्युक्तावपि न रसस्य स्वशब्दोक्तिदोषः तत्र प्रतीन रसतया आस्वाद्यमानस्यैव स्ववाचकपदेनोपस्थितौ तद्दोषाङ्गीकारात् अत्र तु राशिना वीररसत्वेनोत्प्रेक्षितो न तु समास्वादितः ; अन्यथा शृङ्गारादिशब्दोच्चारणमात्रेणैव तद्दोषाङ्गीकारे "शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः" इत्यमरपरिगणनायामपि तद्दोषप्रसङ्ग इति विचक्षणैर्विवेचनीयम् ।

"सत्त्वं द्रव्ये स्वभावे च व्यवसायप्रभावयोः । पिशाचादौ गुणे प्राणचलजन्तुषु चेतसि" इत्यजयः । "सारो बले स्थिरांशे च न्याय्ये क्लीवे वरे त्रिषु" इत्यमरः ।

एतीति आङ्पूर्वस्य इण्धातोः प्रयोगः ।

वसन्ततिलका वृत्तम् ॥ १९ ॥

(ब) कुश इति । नन्विति सम्बोधने । युद्धं युद्धमितीयं वार्त्ता किं श्रुतेति शेषः । वीप्सायां युद्धं युद्धमिति द्विरुक्तिः ।

(भ) लव इति । एतद्युद्धं यत्किञ्चित् अतीवतुच्छमित्यर्थः, न खल्वत्र किमप्युद्वेगकारणमस्तीति भावः । साहङ्कारोक्तिरियम् । दृप्तभावं दर्पोद्धतभावम्, उत्सृज्य विहाय, आर्य्यो भवान् अस्मिन् महापुरुषे अस्यान्तिके इत्यर्थः विनयेन नम्रभावेन वर्त्तताम् आचरतु ।

(म) लव इति । रघुपतिः स्वयं रामचन्द्रः । स्निह्यति वात्सल्यं करोति ।

---

(१) क्वापि युद्धं युद्धमिति द्विरुक्तिर्नास्ति । (२) उद्धतभावमिति पाठान्तरम् । (३) अयमिति क्वचित् पाठः ।

कुशः । सतर्कम् । स रामायणकथानायको ब्रह्मकोषस्य (१) गोप्तायिता ? । (य)

लवः । अथकिम् ?

कुशः । आशंसनीयपुण्यदर्शनः स महात्मा, किन्तु कथमुपगन्तव्य इति न सम्प्रधारयामि । (र)

लवः । यथा गुरुस्तथोपचारेण । (ल)

कुशः । अयि ! (२) कथं नामैतत् ? । (व)

लवः । अत्युदात्तः सुजनश्चन्द्रकेतुरौर्म्मिलेयः प्रियवयस्य इति

युष्मत्सन्निकर्षस्य तव सन्निधानस्य उत्कण्ठते औत्सुक्येन स्मरति तव साक्षात्कारमिच्छतीत्यर्थः । युष्मत्सन्निकर्षस्येति "अधीगर्थदयेशां कर्म्मणी" ति षष्ठी ।

(य) कुश इति । तर्केण विवेचनेन सहेति सतर्कं विविच्येत्यर्थः । स प्रसिद्धः, रामायणमेव कथा उपाख्यानं तस्या नायकः प्रधानपुरुषः उपजीव्य इत्यर्थः, ब्रह्मकोषस्य वेदरूपधनस्य गोपायिता रक्षिता वेदविरोधिराक्षसादिविनाशेन वैदिकाचाराणां पालयितेत्यर्थः । काकुस्वरेण प्रश्नो व्यज्यते ।

(र) कुश इति । आशंसनीयं वाञ्छनीयं पुण्यं पावनं दर्शनं साक्षात्कारो यस्य सः । कथं केन प्रकारेण कीदृशेन भावेनेत्यर्थः उपगन्तव्यः उपस्थातव्यः साक्षात्कर्त्तव्य इत्यर्थः । सम्प्रधारयामि निश्चिनोमि ।

(ल) लव इति । गुरुर्गुरुजनो यथा, तथोपचारेण तादृशव्यवहारेण विनयनम्रभावेनेत्यर्थः । स उपगन्तव्य इत्यन्वयः ।

(व) कुश इति । अयीति सखेदसम्बोधने । एतत् गुरुवदुपचरणं कथं नाम, निःसम्पर्के रामे गुरुवत् व्यवहारः केन हेतुनेत्यर्थः ।

(श) लव इति । अत्युदात्तः अतीवोदारचेताः, सुजनः सौजन्यपूर्णः सतस्वभा-

---

(१) ब्रह्मघोषस्येति पाठान्तरम् । (२) अपीति क्वापि पाठः ।

सख्येन मामुपतिष्ठते, तेन तत्सम्बन्धेन च धर्म्मतात एवायं राजर्षिरिति । (अ)

कुशः । सम्प्रति करणीयो (१) राजन्येऽपि प्रश्रयः । (ब)

लवः । पश्यत्वेनमाकारानुभावगाम्भीर्य्यसम्भाव्यमानविविध-लोकोत्तरचरितातिशयमार्य्यो महापुरुषम् । (स)

कुशः । निर्वर्ण्य । अहो प्रासादिकं (१) रूपमनुभावश्च पावनः ।

…न्वित इत्यर्थः । चीरध्वजः ऊर्म्मिलायाः पुत्रः । प्रियवयस्य इति इत्यभिधायीत्यर्थः सख्येन सौहार्द्देन मां उपतिष्ठते मैत्रीकरणेन मामाराध्नोति सन्तोषयतीत्यर्थः "मध्याराधनीयस्य" त्यात्मनेपदं । केन हेतुना, चकार एवार्थे, तत्सम्बन्धेन चन्द्र-केतुना सह स खल्वसम्पर्केणैवेत्यर्थः, अयं राजर्षिः रामः धर्मेण तातः सुहृदा-चारानुसारेण पितृस्थानीय इत्यर्थः, इति हेतोः, गुरुवत् व्यवहारः कर्त्तव्य इति भावः ।

(ब) कुश इति । सम्प्रति धर्म्मतातत्वसन्तर्के सतीत्यर्थः राजन्येऽपि क्षत्रिये रामेऽपि प्रश्रयः विनयः करणीयः कर्त्तुं योग्यः, अन्यथा उदनयनप्रकारादिदर्शना-दवगतस्य चरित्रस्य मे अन्यक्षत्रियं प्रति विनयाचरणेन कापुरुषता स्यादिति भावः ।

"विनयः प्रश्रयः समा" वित्यमरः ;

(स) लव इति । आकारेण आकृत्या, अनुभावेण प्रभावेण देहस्य तेजो-विशेषेण इत्यर्थः गाम्भीर्य्येण दुरवगाहस्वभावेन च सम्भाव्यमानः अनुमीयमानः विविधानां नानाप्रकाराणाम् लोकोत्तराणाम् अलौकिकानां चरितानां कृतकार्य्याणां अतिशयो बाहुल्यं यत्र स तथोक्तः आकृतिप्रभृतिदर्शनेनैव "यत्राकृतिस्तत्र गुणा वसन्ति" इति न्यायात् अलौकिकचरित इत्यनुमातुं शक्य इत्यर्थः । तमेनं महापुरुषं पश्यतु ।

कुश इति । अहो आश्चर्यं, रूपम् आकृतिः प्रासादिकं प्रसादशालि सर्वान् प्रत्येव अनुग्रहनरत्वात् सौम्यं सुन्दरमित्यर्थः, तथा अनुभावः देहप्रभावः पावनः पवित्रः,

---

(१) श्रवचनीय इति पाठभेदः । (२) प्रामोदिकमिति पाठान्तरम् ।

स्थाने रामायणकविर्देवीं वाचं व्यवीवृतत् (१) ॥२०॥

उपसृत्य। तात! प्राचेतसान्तेवासी कुशोऽभिवादयते! (क)

रामः। एह्येहि आयुष्मन्! । (ख) (२)

अमृताध्मातजीमूतस्निग्धसंहननस्य ते।

परिष्वङ्गाय(३)वात्सल्यादयमुत्कण्ठते जनः ॥२१॥

अतएव रामायणस्य कविः वर्णयिता प्रणेता भगवान् वाल्मीकिरित्यर्थः स्थाने युक्तमेव वाचं देवीं सरस्वतीं व्यवीवृतत् रामायणरूपेण विवर्त्तितवान् रामायणकाव्यरूपेण परिणमितवानित्यर्थः। ईदृशस्य महापुरुषस्य चरितमवलम्ब्य प्रणीतं रामायणमहाकाव्यं सर्वथैव सङ्गतमभूदित्यर्थः।

अत्र रामस्य महापुरुषत्वप्रतिपादनकार्य्यं प्रति रूपलक्षणे एकस्मिन् कारणे सत्यपि पावनानुभवरूपकारणान्तरोपन्यासात् समुच्चयोऽलङ्कारः, परार्द्धं प्रति पूर्वार्द्धं हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गञ्च अन्योन्याङ्गाङ्गिभावेन सङ्करः।

व्यवीवृतदिति विवर्त्तमानं प्रायुङ्क्तेति ण्यन्ते णिचि सति अद्यतन्यादिः ॥ २० ॥

(क) उपसृत्येति। उपसृत्य रामसमीपमुपेत्य। प्राचेतसान्तेवासी वाल्मीकिशिष्यः।

अमृतेति। अयं जनः अहमित्यर्थः वात्सल्यात् स्नेहात् अमृतेन जलेन आध्मातः स्फीतः पूर्ण इति यावत् यो जीमूतो मेघः स इव स्निग्धं मसृणं संहननं शरीरं यस्य तस्य तथोक्तस्य ते तव परिष्वङ्गाय आलिङ्गनाय उत्कण्ठते उत्सुको जायते।

अत्र समासगतोपमाऽलङ्कारः।

"अमृतं।...जलं"। "जीमूतः। मेघः।" "संहननं। शरीरम्" इति च शब्दकल्पद्रुमः।

परिष्वङ्गायेति "तुमर्थाच्च भाववाचिनः" इति चतुर्थी ॥ २१ ॥

---

(१) व्यवीवृषदिति क्वापि पाठः। (२) क्वचित् एह्येहीति द्विरुक्तिर्नास्ति। (३) परिष्वङ्गस्येति पाठभेदः।

परिष्वज्य स्वगतम्। तत्किमपत्यमयं दारकः। (ग)

अङ्गादङ्गात् स्रुत इव*निजो देहजः स्नेहसारः [१]
प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेव
सान्द्रानन्दक्षुभितहृदय[२]प्रस्रवेनेव सृष्टो।
गात्रं [३] श्लेषे यदमृतरसस्रोतसा सिञ्चतीव ॥२२॥

(ग) परिष्वज्येति। तत्किमित्येकमव्ययं प्रश्ने। अयं दारको बालकः तत्किं अपत्यं मम सन्तानः किमित्यर्थः।

नन्वयं दारकः अपत्यमिति कुतः संशय्यते इत्याह अङ्गादिति। यत् यस्मात् अङ्गात् अङ्गात् सर्वेभ्यो देहावयवेभ्य इत्यर्थः स्रुतो विगलितः, निजः स्वकीयः देहजः शरीरजातः स्नेहस्य सार उत्कृष्टांश इव, तथा चेतनाधातुरिव चैतन्य-पदार्थ एव प्रादुर्भूय मूर्त्तिमान् सन् आविर्भूय बहिः देहात् बहिर्देशे स्थित इव, तथा सान्द्रेण निबिडेन आनन्देन आमोदेन क्षुभितम् आलोडितं यद्हृदयम् तस्य प्रस्रवेन रसेन निर्य्यासेनेति यावत् सृष्टो निर्म्मित इव, तथा श्लेषे आलिङ्गने आलिङ्गनसमय इत्यर्थः अमृतरसस्य पीयूषद्रवस्य स्रोतसा प्रवाहेण धारयेत्यर्थः गात्रं मम देहं सिञ्चतीव स्नपयतीव अयं दारक इति शेषः। एवमन्तरेण ईदृशमभूतपूर्व्वमानन्दं न कोपि जनयति नवा प्रियतमो भवेत् अथ च सीतायाः प्रसवात् पूर्व्वमेवाभावात् कथं वा तत्सम्भव इति संशय एवं जायत इति भावः।

अत्र प्रथमपादे भावाभिमानिनी गुणोत्प्रेक्षा, अपरेषु तु त्रिषु पादेषु भावाभिमानिन्यो वाच्याःश्लिष्टाः क्रियोत्प्रेक्षाः, आसां परस्परनिरपेक्षस्थितेः संसृष्टिः।

अत्र धातुशब्दः पदार्थार्थे कविना विवक्षितः। अङ्गादङ्गादिति वीप्सायां द्विरुक्तिः।

मन्दाक्रान्ता वृत्तम् ॥२२॥

---

* च्युत इव, स्नुत इव, सृत इव इति पाठान्तराणि। (१) स्नेहजो देहसार इति पाठान्तरम्। (२) प्रस्रवेणेति विभिन्नः पाठः। (३) गात्रश्लेषे इति भिन्नो पाठः।

लवः । तात ! ललाटन्तपो घर्म्मदीधितिः, तदत्र सालच्छाये मुहूर्त्तमासनपरिग्रहं करोतु तातः (घ)

रामः । यदभिरुचितं वत्साय । (ङ)

सर्वे परिक्रम्योपविशन्ति ।

रामः । स्वगतम् । अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च ॥२३॥

(घ) लव इति । घर्म्माः उष्णाः दीधितयः किरणा यस्य स घर्म्मदीधितिः सूर्यः ललाटन्तपतीति ललाटन्तपः भालदेशसन्तापजनकः नितान्ततापजनक इत्यर्थः, तत्-स्मात् अनावृतस्थाने अवस्थानेन सर्वथासीव रविकिरणतापानुभवात्, सालानां छायेति सालच्छायं तस्मिन् सर्जतरुतले, इत्यर्थः, मुहूर्त्तं कियन्तं कालमित्यर्थः आसनपरिग्रहम् उपवेशनस्वीकारं क ।

ललाटन्तप इति 'ललाटे तप"इति खश् । सालच्छाय इति 'विभाषा सेनासुराच्छायाशालानिशाना"मिति पक्षे क्लीवत्वम् ।

(ङ) राम इति । वत्साय यदभिरुचितं प्रीतिकरमित्यर्थः, तदेव करोमीति भावः ।

वत्सायेति 'रुच्यर्थानां प्रीयमाण"इति सम्प्रदाने चतुर्थी ।

अहो इति । अहो आश्चर्यं, प्रश्रयस्य विनयस्य योगे सत्यपि कुशस्य च लवस्य च उभयोरेवेत्यर्थः: गतिः पादविक्षेपः स्थितिः दण्डायमानता, आसनम् उपवेशनं तान्यादिर्येषां ते गतिस्थित्यासनादयो भावाः शारीरचेष्टाः साम्राज्यं भावि सार्वभौमत्वं शंसन्ति सूचयन्तीति साम्राज्यशंसिनः इति मे मतिभं वर्त्तत इत्यर्थः ।

विनयप्रकाशकाले कविमशारीरचेष्टाप्रदर्शनसम्भावना नास्तीति प्रतिपादनीय प्रश्रययोगेऽपीत्युक्तम् ।

'विनय प्रश्रयः क्षमा"वित्यमरः ।

साम्राज्यप्राप्तिचिह्नमुक्तं सामुद्रे—

'प्रसन्नमूर्त्तिः ससुदारचेताश्चवंशाभिमानः सुखभागविलासः ।
अनीतिभीरुर्गुरुसाधुभक्तः साम्राज्यकाङ्क्षी लभते मनुष्यः ।"

वपुरविच्छितसिद्धा एव लक्ष्मीविलासा:
प्रतिजनकमनीयं कान्तिमत् केतयन्ति ।
अमलिनमिव रत्नं रश्मयस्ते मनोज्ञा
विकसितमिव पद्मं (१)विन्दवो माकरन्दा: ॥२४॥

भूयिष्ठाञ्च रघुकुलकुमारच्छायामनयो: पश्यामि । (च)

'अकर्मकठिनौ हस्तौ पादावध्वनिकोमलौ ।
यस्य पार्थिवलौ राज्ञो तस्य राज्यं विनिर्दिशेत् ।" इत्यादि ॥२३॥

वपुरिति । ते प्रसिद्धा:, मनोज्ञा: सुन्दरा:, रश्मय: किरणा:, अमलिनं निर्मलं स्वभावोज्ज्वलमित्यर्थ: रत्नं मणिमिव, तथा मकरन्दानां पुष्परसानामिमे इति माकरन्दा: विन्दव: मधुकणा: विकसितं प्रस्फुटितं पद्ममिव अविच्छिता: अपि अरचिता अपि सिद्धा: स्वभावनिष्पन्ना एव नतु कृत्रिमा इत्यर्थ: लक्ष्मीविलासा: कान्तिविभ्रमा:, प्रतिजनकमनीयं सर्वलोकाह्लादकरं दर्शनमात्रेणैव सर्वेषां प्रीतिकरमित्यर्थ: कान्तिमत् शोभान्वितं लावण्यमयमित्यर्थ: वपु: शरीरं केतयन्ति आश्रयन्ति अनयोरिति शेष: । ईदृशशोभाविकासो भाविमहासौभाग्यसूचक एवेति भाव: ।

अत्रोपमाद्वयस्य परस्परनिरपेक्षत्वात् संसृष्टिरलङ्कार: ।

जनो जन इति प्रतिजनं वीप्सायां अव्ययीभाव:, प्रतिजनेन कमनीयमिति प्रतिजनकमनीयम् । केतयन्तीति चौरादिकामन्त्रणार्थककेतधातो: प्रयोग: धातूनामनेकार्थत्वादाश्रयार्थलाभ: ।

मालिनी वृत्तम् ॥२४॥

(च) भूयिष्ठामिति । अपि चेति चार्थ: । अनयो: कुशलवयो: देहे इत्यर्थ: भूयिष्ठां प्रभूतां रघुकुलकुमारस्य रघुवंशीयपुत्रस्य छायां प्रतिबिम्बं, सादृश्यमिति यावत् ।

'छाया सूर्यप्रिया कान्ति: प्रतिबिम्बमनातप" इत्यमर: ।

---

(१) विकसितमरविन्दमिति पाठान्तरम् ।

कठोरपारावतकण्ठमेचकं
वपुर्वृषस्कन्धसबन्धुरांसकम् । (१)
प्रसन्नसिंहस्तिमितञ्च वीक्षितं
ध्वनिश्च माङ्गल्यमृदङ्गमांसलः ॥२५॥

सूक्ष्मं निरूप्य । अये ! न केवलमस्मदङ्गसंवादिन्याकृतिः । (क) (२)

ननु कासौ रघुकुलकुमारच्छाया इत्याह कठोरेति । वपुः शरीरं कठोरस्य साव-शेषां वृद्धिं प्राप्तस्य प्रौढ़वयस इत्यर्थः पारावतस्य गृहकपोतस्य कण्ठो गल इव मेचकं श्यामवर्णं, तथा वृषस्य स्कन्ध इव स्कन्धो यस्मिन् तत् उन्नतस्कन्धमित्यर्थः तथा सबन्धुरौ अनुन्नतावनतौ समानाविति यावत् अंसौ बाहुमूलद्वयं यस्मिन् तत् । तथा अनयोः वीक्षितञ्च दृष्टिपातश्च, प्रसन्नः क्रोधादिना अक्षुब्धः यः सिंहः सिंहस्य दृष्टि-रित्यर्थः तद्वत् स्तिमितं स्थिरं, तथा ध्वनिः कण्ठस्वरश्च माङ्गल्यः शुभसूचकः मृदङ्गः मृदङ्गध्वनिरित्यर्थः स इव मांसलः स्थूलः गम्भीर इत्यर्थः । रघुकुले समुत्पन्नाः कुमाराः खल्वेवं प्राया भवन्ति, अनयोरपि तथैव दर्शनात् अपत्यतासंशयः पूर्वतोऽपि घनीभूत इति भावः ।

अत्र चतसृणां समासगतलुप्तोपमानां निर्थोमैरपेक्षात् संसृष्टिः चतुर्थपादे एकम-कारस्यासकृत्साम्यात् छेकानुप्रासश्च । रूढिप्रयोगनयोरभावेऽपि सिंहमृदङ्गशब्दयोस्तद्दृष्टि-तद्ध्वन्यर्थे लाक्षणिकत्वात् नेयार्थत्वदोषद्वयं, तत्र "प्रसन्नसिंहक्षणनिपत्नीक्षणं ध्वनिश्च माङ्गल्यमृदङ्गनादव"दिति पाठेन निरसनीयम् ।

"बन्धुरमुन्नतानत"मित्यमरः । "मांसलः । ...स्थूलः ।" इति शब्दकल्पद्रुमः । वंशस्थविलं वृत्तं 'वदन्ति वंशस्थविलं जतौ जरौ" इति लक्षणात् ॥२५॥

(क) सूक्ष्ममिति । सूक्ष्मं निरूप्य विशेषेणावलोक्य इत्यर्थः । अस्मदङ्गैः मदीय-देहावयवैः सह संवदति सम्मीलति सदृशी भवतीत्यङ्गसंवादिनी । अनयोराकृतिः न केवलं समाकृतिसदृशीत्यर्थः ।

(१) सबन्धुरांसकमिति पाठान्तरम् ।(२) अस्मत्संवादिनी इति पाठभेदः ।

अपि जनकसुतायास्तच्च तच्चानुरूपं(१)
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥२६॥

मुक्ताच्छदन्तच्छविसुन्दरीयं(२) सैवोष्ठमुद्रा स च कर्णपाशः ।
नेत्रे पुनर्यद्यपि रक्तनीले तथापि सौभाग्यगुणः स एव ॥२७॥

किमाहेत्याह अपीति । इह शिशुयुग्मे अस्मिन् कुशलवात्मके बालकद्वये नैपुणेन निपुणभावेन उन्नेयं वितर्क्यं न त्वापातत एव बोध्यमित्यर्थः जनकसुतायाः सीताया अपि तच्च तच्च मया प्रत्यक्षीकृतं सर्वमित्यर्थः अनुरूपं रूपस्य योग्यत्वं सादृश्यमित्यर्थः स्फुटं स्पष्टमस्ति वर्तते । यदि कश्चिदनयोः आकृतिं निपुणभावेनावलोकयेत् तदा निश्चितमेव सुस्पष्टं सीतासादृश्यं पश्येदिति सरलार्थः । नन्वित्यवधारणे । अभिनवं नूतनं नवविकसितमित्यर्थः यत् शतपत्रं पद्मं तदिव श्रीमत् कान्तिमत् प्रियायाः सीतायास्तदास्यं वदनं मे मम अक्ष्णोः चक्षुषोः पुनर्भूयोऽपि गोचरीभूतमिव विषयीभूतमिव अनयोराननमवलोक्य सीताया आननं स्मरामीत्यर्थः ।

अत्र समासगतोपमासङ्कीर्णा वाच्या भावाभिमानिनी क्रियोत्प्रेक्षाऽलङ्कारः, तेन च स्मरणालङ्कारो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ।

"प्रश्नावधारणानुज्ञाऽनुनयामन्त्रणे ननु" इत्यमरः ।

मालिनी वृत्तम् ॥२६॥

सीताया आकृतिसादृश्यं भूयोऽपि प्रतिपादयति मुक्तेति । मुक्ता मौक्तिकानीव अच्छाः निर्मला ये दन्ता दशनाः तेषां छविभिः कान्तिभिः सुन्दरी मनोहरा इयं, दृश्यमाना ओष्ठमुद्रा रदनच्छदयोर्मुद्रणं सैव सीतासम्बन्धिन्येव सीतासदृश्येव, तथा कर्णपाशः प्रशस्तं कर्णद्वयं स च स एव सीतासम्बन्धी एव सीतायाः कर्णयुगलसमान एव । पुनः किन्तु, यद्यपि नेत्रे अनयोर्नयनद्वयं रक्तनीले प्रान्तभागे लोहितवर्णे

---

(१) चानुरूपमिति पाठभेदः । (२) छविदन्तुरेयं, छविसुन्दरेयं इति पाठान्तरद्वयम्

तदेतत् प्राचेतसाध्युषितमरण्यं, यत्र किल देवी परित्यक्ता; इयञ्चानयोराकृतिर्वयोऽनुभावश्च(१)यदपि स्वतःप्रकाशान्यस्त्राणीति, तत्र विमृशामि, अपि खलु सञ्चित्रदर्शनप्रासङ्गिकमस्त्रा-

---

ताराभागे च नीले, सीतायास्तु केवलनीलकुवलयसमाने नयने, तेन कुमारयोर्नयनयो लौहित्यांशे सीताया नयनाभ्यां सह यद्यपि वैषम्यमित्यर्थः तथापि सौभाग्यगुणः सौन्दर्यरूपो गुणः स एव सीतासम्बन्धीव सीतासदृश एवेत्यर्थः, रक्तांशे वैषम्ये सत्यपि सौन्दर्यांशे सीतानयनाभ्यां सह अनयोर्नयनयोः सौसादृश्यमस्त्येवेत्यर्थः। एतेन ततोऽपि अपत्यसंशयो दृढीभूत इति भावः।

अथ अन्यस्य ओष्ठमुद्रादयः कथमन्यस्य भवेयुरिति वस्तुसम्बन्धासम्भवेन सीताया ओष्ठमुद्रादय इव ओष्ठमुद्रादय इति सादृश्यबोधनपर्य्यवसानात् निदर्शनाऽलङ्कारः स च प्रथमचरणस्थसमासगतोपमया सङ्कीर्य्यते, प्रथमचरणे छेकानुप्रासश्चेति समुदाये संसृष्टिः।

"पाशः, कैशादिपूर्व्वः स्यात् ततमङ्के, कर्णपूर्वकः।
सुवर्णे च स्वसामर्थ्यात् मृगपक्ष्यादिबन्धने।" इति मेदिनी।

इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥२७॥

(अ) इत्यनाकृतिसादृश्यरूपं संशयकारणमभिधाय कुशलवयोरपत्यतानिश्चये हेतुमुपन्यस्यति तदेतदिति। यत्र अरण्ये देवी सीता। एतदग्रतो दृश्यमानं तत् प्राचेतसेन वाल्मीकिना अध्युषितम् अधिष्ठितम् अरण्यं तपोवनम्। अतएवात्र अनयोः कुमारयोः प्रसवः सीतायाः सम्भवत्येवेति भावः। अपिचेति चकारस्यार्थः। आकृतिः सीताया मम च शरीरानुरूपं शरीरमित्यर्थः, वयः द्वादशवत्सरपरिमितमिव वयो लक्ष्यत इत्यर्थः, अनुभावः प्रभावः तेजस्वितेति यावत्। अयमाशयः, मातापित्रोराकारानुरूप एवाकारः प्रायेणापत्यानां जायत इति सीतायाः मम च आकारसौसादृश्यादिमौ बालकौ अपत्यतया निर्द्धारयितुं शक्यौ, तथा सीतापरित्यागात् परं द्वादशवत्सरा अतीता अनयोरपि द्वादशवत्सरपरिमितमिव वयो लक्ष्यते अतएव वयोवैषम्येणापि अपत्यत्वस्य

---

(१) आकृतिर्वत्सयोः; आकृतिर्वपुरिति पाठभेदौ।

अभ्यनुज्ञानमुद्भूतं (१) स्यात्, नह्यसाम्प्रदायिकान्यस्त्राणीति पूर्वेषामप्यनुशुश्रुम; अयञ्च संप्लवमानमात्मानं सुखातिशयो हृदयस्य मे विस्त्रम्भयति, भूयिष्ठञ्च मया द्विधा प्रतिपन्नो देव्या गर्भभार आसीत् । (ज)

असम्भवता न शङ्कनीया, तथा रघुवंशोचितस्वाभाविकप्रभावदर्शनात् भरतादिपुत्राणाम-तावस्थानासम्भवात् तेषां पूर्वपरिचितत्वाच्च बालकाविमौ ममैव पुत्राविति निश्चयो युज्यत एवेति । ननु तव पुत्रत्वे कथमनयोर्जृम्भकास्त्रलाभ इत्याह यदपीति । "स्वतः प्रकाशान्यावयोरस्त्राणी"ति लवेन यदप्युक्तमित्यर्थः, तत्र अस्त्रलाभविषये, विमर्शमिति विवेचनं करोमि । अपिशब्दः सम्भावनायां, खलुशब्दो वाक्यालङ्कारे । तत् पूर्वकृतं चित्रदर्शनप्रासङ्गिकं प्रथमाङ्के चित्रदर्शनप्रसङ्गेनोत्थितम् अस्त्राभ्यनुज्ञानं सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्तीति मम वाक्येन सीतापुत्रस्य जृम्भकास्त्रलाभानुमतिः, उद्भूतम् उत्पन्नं, चित्रदर्शनवेलायां । 'सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ती'ति मया यदुक्तं तदनुसारादेव अनयोः जृम्भकास्त्रलाभोऽभवदिति सम्भावयामीति सरलार्थः । ननु अन्यस्मादपि अनयोः जृम्भकास्त्रलाभः कथं न सम्भाव्यत इत्याह नहीति । सम्प्रदायो गुरूपदेशपरम्परा अस्त्राणि जृम्भकास्त्राणि असाम्प्रदायिकानि गुरूपदेशपरम्परामन्तरेणापि लभ्यानि, ब्रह्मकृशाश्वकौशिकैतच्छिष्यात्मकगुरुपरम्परया उपदेशं विनापि केनचित् प्राप्तानीत्यर्थः इति पूर्वेषां प्राचीनानामपि समीपे नहि अनुशुश्रुम न खलु श्रुतवन्तः वयमिति शेषः । ततश्च तस्मादस्मदभ्यनुज्ञानादेवानयोर्जृम्भकास्त्रलाभ इति मन्तव्यं, तेन च मम पुत्रावेव इमौ बालकाविति निर्द्धारितं स्यादिति भावः । अपिचेति चार्थः । अयम् अनुभूयमानः हृदयस्य सुखातिशयः अनयोर्दर्शनालिङ्गनादिजनितानन्दबाहुल्यं मे मम संप्लवमानम् इमौ पुत्रौ नवेति संशयसागरे सन्तरन्तमित्यर्थः आत्मानम् अन्तःकरणं विस्त्रम्भयति सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तय इति न्यायात् इमौ

(१) अपि न खलु तच्चित्रदर्शनप्रस्तावे कृतमभ्यनुज्ञानमुद्भूतं स्यादिति पाठान्तरम् ।

साश्रम्। पुरारूढे स्नेहे परिचयविकासादुपचिते
रहो विस्रब्धाया अपि सहजलज्जाजडदृशः।
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥२८॥

रुदित्वा। तत् किमिती पृच्छामि केनाप्युपायेन। (भ)

मत्यैव पुत्राविति विश्वासयतीत्यर्थः। "भ्रातरावावां यमजौ" विति लवोक्तं युक्त्या समर्थयन्नपि तयोः पुत्रत्वं निश्चिनोति भूयिष्ठश्चेति। अपिचेति चार्थः। देव्याः सीतायाः, गर्भभारः अतीववृद्धिं प्राप्तत्वात् भारवान् गर्भः भूयिष्ठं प्रचुरम् अनेकवारमित्यर्थः, द्विधा द्विप्रकाराभ्यां भागद्वयेन विभक्त इत्यर्थः, प्रतिपन्नः ज्ञातः।

ननु कथं त्वया स गर्भो द्विधा ज्ञात इत्याह पुरेति। पुरा पूर्वं परिणयकाले इत्यर्थः रूढे उत्पन्ने स्नेहे प्रेमणि परिचयविकासात् असकृदेकत्रावस्थानादिजनितपरस्परप्रियत्वप्रकारकविशेषज्ञानोदयात् उपचिते वृद्धिं प्राप्ते सति रहो निर्जनस्थाने विस्रब्धायाः इदं निभृतस्थाने प्रियतमकरस्पर्शं न कोऽपि अपरः पश्येदिति विश्वस्ताया अपि सहजा स्वाभाविकी या लज्जा तया जडे दर्शनाक्षमे मुद्रितप्राये इत्यर्थः दृशौ चक्षुषी यस्याः सा तथोक्ता, तस्याः गर्भग्रन्थिः गर्भकोषबन्धनं मयैव ननु तया इत्येवशब्दार्थः करतलस्य यः परामर्शः संवाहनं तस्य या कला अल्पांशः तया पाणितलस्य ईषत् संवाहनेनेत्यर्थः अधिकसंवाहने लज्जाशीला सीता पाणिमुत्सारयतीति प्रतिपादनाय कलाशब्दप्रयोगः, आदौ सीतायाः प्राक् द्विधा विभक्त इत्यर्थः ज्ञातः एकवृन्तगतफलद्वयवत् एककोषगतं स्तनद्वयमनुभूतमित्यर्थः, तदनु ततः परं कैरपि दिवसैः कतिपयदिनैः तया सीतया च ज्ञात इत्यन्वयः। अतएव इमौ कुमारौ ममैव पुत्राविति निश्चय एव न्याय्य इति भावः।

अत्र ज्ञात इत्येकया क्रियया, मया तयैव भर्त्रोः कर्त्तृत्वेनाभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः।

दिवसैरिति वृत्तौयाऽपवर्गे।

शिखरिणी वृत्तम् ॥२८॥

(भ) रुदित्वेति। पुत्रत्वेनानुमीयमानयोरपि असाधारणगुणशालिनोः कुशलवयो

लवः । तत्किमेतत् ।

वाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥२८॥

कुशः । अयि वत्स !

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति । (१)

पुत्रवद्वात्सल्याद्रामदर्शनात् शोकक्षोभेण रामस्य रोदनं बोद्धव्यम् । तत् किंनिमित्तं कस्यार्थे प्रश्नार्थे । उपायेन वाक्यच्छलेन एतौ कुशलवौ : मनसि वितर्कोऽयम् ।

वाष्पेति । जगन्मङ्गलं प्रसादशीलतया दृष्ट्यामानन्दजनकमित्यर्थः वो युष्माकम् आननं वदनं वाष्पवर्षेण अश्रुवर्षणेन, अवश्यायेन हिमेन अवसिक्तस्य आर्द्रीकृतस्य पुण्डरीकस्य श्वेतपद्मस्य चारुतां सौन्दर्यं तत् किं नीतं कथं प्रापितं, कथं जातमित्यर्थः ।

अत्र अन्यस्य चारुता कथमन्येन नीयत इति वस्तुसम्बन्धोऽसम्भवन् पुण्डरीकस्य चारुतामिव चारुतामिति बिम्बप्रतिबिम्बभावं बोधयतीति असम्भवद्वस्तुसम्बन्धा निदर्शनाऽलङ्कारः ।

विरहेण दुःखप्लुतं रामाननं श्वेतपद्मवत् सुन्दरमिति बोध्यम् ।

'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्' । "'पुण्डरीकं सिताम्भोज'" मिति चामरः ।

वः इति गुरुत्वाद्बहुवचनम् ॥२८॥

विनेति । सीतादेव्या विना जानकीमन्तरेण रघुपतेः रामस्य किमिव किं वस्तु न दुःखं न दुःखकारणम् अपि तु आश्वासाभावात् सर्वमेव राज्यैश्वर्यादिकं दुःखकारणमित्यर्थः । ननु कथं दुःखकारणमित्याह प्रियेति । प्रियाया वल्लभाया भार्याया नाशे अभावे सति कृत्स्नं जगत् सकलं भुवनम् अरण्यं गहनवनं हि निश्चितं भवति सर्वलोकस्येति शेषः । किलेति लोकवार्त्तायां एवं लोका वदन्तीत्यर्थः । प्रियभार्याया

---

(२) जगदिदमरण्यं हि भवतीति पाठान्तरम् ।

स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमित्येवं पृच्छस्यनधिगतरामायण इव ॥३०॥

रामः । स्वगतम् । अये ! तटस्थित आलापः, कृतं प्रश्नेन दग्धहृदय ! कोऽयमाकस्मिकस्ते स्नेहपरिप्लवो विकारः, [१] एवमस्मि निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि, भवतु ताव

अभावे आनन्दकारणं वस्तुजातं वन्यश्वापदकुलमिव आश्वासाभावात् नितरां दुःखमुत्पादयतीत्यर्थः । अपिचेति चार्थः । तावान् तत्परिमितः अतिगाढः स पूर्वानुभूतः स्नेहः सीतां प्रति प्रणयः आसीत्, अयमपि इदानीमनभूयमानश्च वियोगो विच्छेदः निरवधिः असीमः यावज्जीवं स्थायीत्यर्थः । सीताया जीवनकाले ताद्दृशप्रेमालापादिजनितं निरतिशयं सुखमासीत् इदानीन्तु निरवधि विरहजन्यं दारुणदुःखं अतएव सुखानुभवानन्तरं दुःखानुभवस्य नितान्तदुःसहत्वात् एष रोदितीति भावः । अत एव अनधिगत अविदितं रामायणं स्वनाम्ना प्रसिद्धं वाल्मीकिरचितं महाकाव्यं येन स तथोक्तः रामायणमजानन्निवेत्यर्थः किमिति कथं, एवं तत्किमेतत्, वाष्पवर्षेण नीतं व इत्यं, पृच्छसि रामं जिज्ञाससे । सर्वमेव रामायणेतिहाससमवगस्य पुष्कलमेव रामस्य रोदनकारणं जानतोऽपि तवायं प्रश्नो न समञ्जस इति भावः ।

अत्र द्वितीयचरणसामान्येन प्रथमचरणगतविशेषसमर्थनादर्थान्तरन्यासः, किञ्च द्वितीयचरणे 'मुखं तव कुरङ्गाक्षि ! सरोजमिति नान्यथा" इत्यादिवत् समासाभावेऽपि निरङ्गं केवलरूपकम्, अनयोरङ्गाङ्गिभावेन सङ्करः, तथा चतुर्थचरणे प्रयोजनं विनाऽपि इवशब्दप्रयोगात् निरर्थकत्वदोषः, स तु किमिव नहि दुःखं रघुपतेरिति व्यत्ययपाठेन समाधेयः, तत्पाठे नञ् समानार्थो नहिशब्द इति बोध्यम् ।

शिखरिणी वृत्तम् ॥३०॥

(अ) राम इति । आलापः कुशलवयोर्भिर्थोभाषणं तटस्थित उदासीनः सीताया नात्रत्वसम्बन्धोल्लेखरहित इत्यर्थः । सीतारामौ खल्वावयोर्मातापितराविति

---

(१) आकस्मिकस्ते पारिप्लवो विकार इति पाठभेदः ।

दन्तरयामि । (प्रकाशम्) वत्सौ ! रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः प्रशस्तिरादित्यवंशस्य तत्र कौतूहलेन यत्किञ्चिच्छ्रोतुमिच्छामि । [ञ] [१]

कुशः । स कृत्स्न एव सन्दर्भोऽस्माभिरावृत्तः स्मृत्युपस्थितौ तावदिमौ बालचरितस्यान्त्येऽध्याये श्लोकौ । [२] [ट]

चेदिमौ जानीयातां तदा निःसम्पर्कवत् सीतादिभ्या इति रघुपतेरिति च कथमपि कुशो न वदेत् किन्तु मातरं विना पितुः किमपि न दुःखमित्येव वदेदिति भावः । अतएव प्रश्नेन सीता किं युवयोर्माता इत्येवं मम जिज्ञासया कृतम् अलम् । अविदितसीतासम्बन्धतया वाञ्छितविषयं वक्तुं न शक्नुयात्, सुतरां तादृशो मम प्रश्नो निरर्थक इति विराम एव श्रेयानिति भावः । इमौ सीतायाः सुतावेव प्राप्तावित्याशायाः परिचयोपायाभावात् अपूर्णत्वेन समुत्पन्नसन्तापसम्भृतत्वात् दग्धेति हृदयस्य विशेषणम् । अकस्मादागत इत्याकस्मिकः हठादुपस्थितः विशेषकारणं विनापि जनित इत्यर्थः, स्नेहेन वात्सल्येन परिप्लवश्चञ्चलः विकारः अन्यथाभावः । किञ्चेति चार्थः । एवं अनेन प्रकारेण अश्रुवर्षेणेनेत्यर्थः निर्भिन्नः प्रकाशितः हृदयस्य आवेगः शोकक्षोभौ यस्य स तथोक्तः । अनुकम्पितः दयापात्रीकृतः । अयमतीवलज्जा विषय इति भावः । अन्तरयामि गोपयामि हृदयावेगमित्यर्थः । रामायणमिति रामायणत्वेन प्रसिद्धः । सरस्वत्या वाचः निष्यन्दः अवस्रंसनं क्षरणमित्यर्थः एतेन तद्वाक्यस्य पीयूषतुल्यत्वं व्यज्यते । आदित्यवंशस्य सूर्यवंशस्य प्रशस्तिः प्रशंसा कीर्त्तिविस्तारहेतुरित्यर्थः, श्रूयते लोकपरम्परयेति शेषः । तत्र तद्विषये ।

चञ्चलं तरलं चैव पारिप्लवपरिप्लवे इत्यमरः ।

तटे अलक्षितविषये स्थित इति तटस्थितः । अन्तरम् अन्तर्हितं करोमीति अन्तरयामि करोत्यर्थे इन् ।

(ट) कुश इति । कृत्स्नः सम्पूर्णः । सन्दर्भो ग्रन्थः, आवृत्तः असकृत्पाठेन अभ्यस्तः स्मृत्युपस्थितौ स्मरणविषयौ जातौ ।

---

(१) किञ्चित् श्रोतुमिति पाठान्तरम् । (२) द्वौ श्लोकौ इति क्वापि पाठः ।

रामः। उदीरयतु वत्सः। (ठ)

कुशः। प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः।
प्रियभावः स तु तया स्वगुणैरेव वर्द्धितः ॥३१॥
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥३२॥ इति।

(ठ) राम इति। उदीरयतु उच्चारयतु।

प्रकृत्यैवेति। सीता वैदेही प्रकृत्या स्वभावेनैव नतु केनचिदागन्तुकेन भावविन्यासादिनेतीवशब्दार्थः, महात्मनः उदारचरितस्य रामस्य प्रिया वल्लभा आसीत्। ननु सर्वप्रणयिनि उदारचित्तस्य रामस्य सर्व एव प्रिय इति सीतायाः का प्रशंसा इत्याह। स तु प्रियभावः प्रीतिः तया सीतया स्वगुणैरेव निजसत्यसरलताविनयादिभिरेव नतु रामस्यौदार्य्येणेत्येवशब्दार्थः वर्द्धितः उपचितः ॥३१॥

तथैवेति। रामः तथैव सीता यथा रामस्य प्रिया आसीत् तद्वदेव सीतायाः प्राणेभ्योऽपि जीवनादपि प्रियः प्रेयान् अभवत्। तु किन्तु हृदयं परस्परस्य चित्तमेव कर्त्तृ परस्परम् अन्योन्यगतं प्रीतियोगं प्रणयसम्बन्धं जानाति नतु ताभ्यामन्यजनस्य हृदयं कर्त्तृ तं प्रीतियोगं जानातीत्यर्थः।

अत्र आर्थी परिसंख्याऽलङ्कारः;

इदानीन्तनवाल्मीकिरामायणपुस्तकेषु तु बालकाण्डस्य शेषेऽध्याये ईदृशौ श्लोकौ न दृश्येते, किन्तु निम्ननिर्दिश्यमानप्रकारौ विद्येते —

प्रिया तु सीता रामस्य दाराः पितृकृता इति।
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो विवर्द्धते ॥
तस्याश्च भर्त्ता द्विगुणं हृदये परिवर्त्तते।
अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा ॥

तस्मान्नाव्यं, भवभूतिसमानकालवर्त्तिनि तद्वाचिपाठ्यदेशप्रचलितपुस्तकनिवहे भवभूतिलिखितप्रकारावेव स्थितौ, इदानीन्तनाखदेशीयपुस्तकेषु तु अन्यथाभावं गताविति॥३२

रामः। कष्टमतिदारुणो हृदयमर्म्मोपघातः [१] हा देवि! एवं किल तदासीत्। अहो! निरन्वय-[२] विपर्य्यास-विरसवृत्तयो विप्रलम्भपर्य्यवसायिनस्तापयन्ति संसार-वृत्तान्ताः। [ड]

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः
क्व तेऽन्योन्यं यत्नाः क्व च नु गहनाः कौतुकरसाः।

(ड) राम इति। हृदयमर्म्मणि वक्षसोऽन्तर्वर्त्तिनि सन्धिवर्त्मनि उपघातः आघातः शोकप्रहार इति यावत्। ईदृशयथावत्कान्यच्छकश्लोकश्रवणेन हृदये शोकस्य अतिनिष्ठुरः प्रहार इवानुभूयत इत्यर्थः। तदा तस्मिन् सीतासंयोगकाले, एवं वाल्मीकिवर्णितप्रकारः प्रीतियोग इत्यर्थः आसीत्। किल सम्भावनायां। निर्न्विद्यते अन्वयः कारणं यस्य स निरन्वयः ऐहिकहेतुं विना उत्पन्न इत्यर्थः यो विपर्य्यासः अवस्थापरिवर्त्तनं तेन विरसा निष्ठुरा वृत्तिर्भावो येषां ते तथोक्ताः विप्रलम्भे विच्छेदे पर्य्यवस्यन्ति परिणमन्तीति विप्रलम्भपर्य्यवसायिनः अवसाने वियोगे परिणता इत्यर्थः, संसारवृत्तान्ताः जगतां घटनाः। सीतया सम्मिलनकाले सुखस्य परां काष्ठामनुभवन्नहं इदानीं यथा तद्विच्छेदेन दुःखस्यापि परां काष्ठामनुभवामि जगतां प्रायेण सर्व्वेषामेव तथेति भावः।

क्वेति। निर्न्विद्यते अतिशयो यस्मात् तेन निरतिशयेन विस्रम्भेण परस्परस्य परस्परप्रियत्वप्रकारकविश्वासेन बहुलः गाढ़ इत्यर्थः, तावान् तत्परिमितः अतिगरीयान् इत्यर्थः आनन्दः सीतया सह प्रेमालापादिजन्यं सुखं क्व कुत्र गतमिति शेषः। अन्योन्यं परस्परं प्रति ते पूर्व्वानुभूता यत्नाः परस्परयोः सुखहेतवे परस्परयोश्चेष्टाः क्व कुत्र गता इति शेषः। तथा गहनाः निविडाः कौतुकरसाः परस्परनर्म्मालापादिजनितानन्दाश्च क्व नु गताः, सुखे वा सुखानुभवे च दुःखे वा दुःखानुभवे च हृदययोः आवयो

---

(१) हृदयमर्म्मोद्घात इति पाठान्तरम्। (२) निरन्वय इति पाठभेदः।

सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययो
स्तथाप्येष प्राणः स्फुरति, न तु पापो विरमति ॥३३॥

भोः ! कष्टम् (ढ)

प्रियागुणसहस्राणामेकोन्मीलनपेशलः ।
य एव दुःस्मरः कालस्तमेव स्मारिता वयम् ॥३४॥

मनसोः तत् पूर्वस्थितं ऐक्यं एकरूपत्वं क्व नु गतं, परस्परयोः सुखे परस्परयोः सुखित्वं परस्परयोर्दुःखे परस्परयोर्दुःखित्वञ्च कुत्रेदानीं गतमित्यर्थः । ईदृशमिरतिशयसुखान्यनुभूय अधुना तदनुरूपदारुणदुःखानुभवेन जीवनं भारभूतमिव जातमिति सत्यम् इति भावः । तथापि एष मदीयः पापः पापजनितदारुणदुःखानुभवी प्राणः हृन्मारुतः स्फुरति स्पन्दते श्वासप्रश्वासात्मिकां निर्गमप्रवेशक्रियां करोतीत्यर्थः, तु किन्तु न विरमति श्वासप्रश्वासकरणात् न विश्राम्यति देहमपहाय न गच्छतीत्यर्थः । इदानीं सर्वथैव मरणमेव मे श्रेय इति भावः ।

अत्र सुदारुणदुःखरूपे प्राणस्फुरणविरामस्य पुष्कलकारणे, सत्यपि तदभावात् विशेषोक्तिरलङ्कारः ।

प्राणो तु मारुते बोले काव्यजीवेऽनिले बले इति मेदिनी ।

असु प्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्च प्राणादय उच्यन्ते न पुनरेकं काभिधाने बहुवचनम् अतएव प्राणोऽपानं इत्युक्तं, हृदि प्राणो गुदेऽपान इत्यादि न दृश्यते इत्यमरटीकायां भरतः ।

निघ्नन् प्रियं प्राणमिवाभिमानमिति किरातेऽपि ।
शिखरिणी वृत्तम् ॥३३॥

(ढ) भो इति । आत्मसम्बोधने भोःशब्दः ।

किमात् कष्टमित्याह प्रियेति । प्रियायाः सीतायाः गुणानां रूप-विनय-लावण्य-पातिव्रत्यादीनां सहस्राणि तेषां, एकं मुख्यं सम्पूर्णमित्यर्थः यदुन्मीलनं प्रकाशः कतृत्वापस्थितिरिति यावत् तत्र पेशलः दक्षः समर्थ इति यावत् सीताया रूपविनयाद्यात्मकगुणानां सम्पूर्णभावेन स्मृतिकारक इत्यर्थः; य एव कालः प्रेमालापादिसम्भोग-

तदा किञ्चित् किञ्चित् कृतपदमहोभिः कतिपयै-
स्तदीषद्विस्तारि स्तनयुगल-(१) मासीत् स्मृतिगतम् ।
वयःस्नेहाकूतव्यतिकरघनो यत्र मदनः
प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि ॥३५॥

समयः दुःस्मरः स्मर्तुमशक्यः यस्य स्मरणमतीवदुःखकरमित्यर्थः वयं तमेव कालं स्मारिताः तत् कालस्य स्मृतिं प्रापिताः अनेन कुमारेणेति शेषः । एतदेव कष्टमिति भावः ।

स्मरो दर्पे च पिशुन इत्यमरः ॥३४॥

तत्कालस्य दुःस्मरत्वं प्रतिपादयति तदेति । तदा तस्मिन् समये किञ्चित् किञ्चित् अल्पाल्पं यथा स्यात्तथा कृतपदं लब्धस्थानं आविर्भूतं स्मृतिगतम्: हरिणवत्स्य शावनायाः सीतायाः तत् स्मृतिपथारूढं स्तनयुगलं कतिपयैरहोभिः कियद्भिरिव दिनैः ईषद्विस्तारि अल्पविस्तृतं नतु अतिपीवरतया परस्परसंघृष्टमित्यर्थः आसीत् अभवत् । यत्र यस्मिन् काले वयसो यौवनस्य, स्नेहस्य अनुरागस्य, आकूतस्य सम्भोगाभिप्रायस्य च व्यतिकरेण सम्मेलनेन घनो निविड़ः दुर्द्दम इत्यर्थः मदनो मन्मथः हृदि मनसि प्रगल्भो विशालः व्यापारः क्रिया यस्य स प्रगल्भव्यापारः उद्दामाडम्बरः सन् इत्यर्थः स्फुरति प्रकाशते, वपुषि शरीरे च मुग्धः लज्जया सर्वदा बहिर्व्यापारासम्भवात् मूढ़ः प्रतिहतक्रियः सन् इत्यर्थः स्फुरति अङ्गानामिति शेषः, मन्मथप्रभावो हृदये सर्वदैव यथा स्फुर्त्तिं जायते, लज्जावशात् शारीरिकालिङ्गनादौ सर्वदा तथा प्रकाशितुं नार्हति, किन्तु यौवनोदयात् मन्मथभावावेशाच्च देहे किमपि सुन्दरं लावण्यमुत्पद्यत इति भावः ।

अत एतस्य मदनस्य हृदयदेहयोर्गोचरत्वात् पर्य्यायनामाऽलङ्कारः । तथा यच्छब्द-संवलितवाक्यस्य परत्र पाठात् वाक्यगतो विधेयाविमर्शदोषः, स च पद्यार्द्धस्य प्राक्-पाठेन समाधेयः ।

आकूतं स्यादभिप्राय इति हैमः । मुग्धः सुन्दरमूढयोरिति विश्वः ।

शिखरिणी वृत्तम् ॥३५॥

(१) स्तनमुकुलमिति पाठान्तरम् ।

कुशः । अयञ्च मन्दाकिनीचित्रकूटवनविहारे सीतादेवी-मुद्दिश्य रघुपतेः श्लोकः । (थ)

त्वदर्थमिव विन्यस्तः शिलापट्टो (१) ऽयमग्रतः ।
यस्यायमभितः पुष्पैः प्रवृष्ट इव केसरः ॥२६॥

रामः । सलज्जस्मितस्नेहकरुणम् । अतिनामायं मुग्धः शिशुजनो-

(थ) कुश इति । अयं मया उच्यमानः । प्रकृत्यैव प्रिया सीता इत्यादुक्तः समुच्चयार्थश्चकारः । मन्दाकिनी चित्रकूटाचलसमीपवाहिनी काचन नदी । तथा च रघुवंशे मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः । चित्रकूटः काचन पर्वतः तयोर्वनेषु विहारे क्रीडाकाले । सीतादेवीमुद्दिश्य विदमानं लक्ष्यीकृत्य राम एककर्तृकत्वहानिः ।

त्वदर्थमिति । अयं अग्रवर्त्ती, शिलापट्टः विशालः प्रस्तरखण्डः, त्वदर्थमिव तव शयनार्थमित्यर्थः, अग्रतः पुरोभागे विन्यस्तः केनचित् स्थापितः । यस्य शिलापट्टस्य अभितः उभयोः पार्श्वयोः अयं केसरः वकुलतरुः पुष्पैः प्रवृष्ट इव वर्षतीव । अतस्त्वमत्रेदानीं शयितुमर्हसीति भावः ।

अत्र प्रथमा गुणोत्प्रेक्षा द्वितीया च क्रियोत्प्रेक्षा, उभयोः सापेक्षत्वात् सङ्करः । सुखस्वैरविहारस्थानमिदमिति तदर्थमुदाम्यतामिति व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः ।

अथ केसरः । वकुल इत्यमरः ।

यस्येति तसोभयाभिपरितः र्वैरित्यनेन द्वितीयाप्राप्तावपि आर्षत्वात् सम्बन्धविवक्षया षष्ठी । प्रवृष्ट इत्यकर्मकत्वविवक्षया कर्त्तरि क्तः, पुष्पैरिति करणे तृतीया ।

इदानीन्तने तद्दशीयरामायणे अस्य श्लोकस्यादर्शनात् भवभूतिसमकालीने दाक्षिणात्यपुस्तकनिवहे त्वासीदितात्रापि मन्तव्यम् ॥२६॥

(त) राम इति । कुशेन सम्भोगशृङ्गारस्य प्रकाशनात् लज्जा, तस्य नितान्त-मुग्धतादर्शनात् स्मितम् ईषत् हास्यम्, पुत्रत्वबोधात् स्नेही वात्सल्यम्, सीतायाः स्मरणात् करुणः शोकः तैः सह वर्त्तमानमिति तथोक्तम् । अयं शिशुजनः कुशः

---

(१) शिलापाद इति पाठान्तरम् ।

विशेषतस्त्वरण्यचरः। हा देवि! स्मरसि वा तस्य प्रदेशस्य तत्समयविस्रम्भातिशयप्रसङ्गसाक्षिणः?। कष्टं भोः कष्टम् (त)

श्रमाम्बु शिशिरीभवत्प्रसृतमन्दमन्दाकिनी-
मरुत्तरलितालकाकुलललाटचन्द्रद्युति।

अतिनाम अतीव मुग्धः मूढः सम्भोगवृत्तान्तानभिज्ञ इत्यर्थः। स्वतः प्राचीनस्य समान्तिके सम्भोगप्रहृष्टस्योतकस्य त्वदर्थनिवर्त्त्यादियोकस्य असङ्कोचं मे धाभिधानादिति भावः। अरण्यचरो वनवासी। सुतरां ग्राम्यबालकस्येव सार्थं समालोचनयापि स्पष्टस्ययुवतियुव-कानां वृत्तान्ताभिज्ञत्वमस्य न सम्भाव्यते, अत एव सर्वथैव सम्भोगादिलौकवृत्तान्ता-नभिज्ञोऽयं कुमार इति भावः। तस्मिन् समये विहारकाले विस्रम्भातिशयेन विश्वास-बाहुल्येन अधुना निर्जनोऽयं प्रदेशः मया केनचित् सत्वरमवागन्तव्यं सुतरां निःसङ्को-च व्यवहारस्यावसरमिदमिति विश्वासातिरेकेणेत्यर्थः। यः प्रसङ्गः विहारप्राप्तिः तस्य साक्षी द्रष्टा तस्य; प्रदेशस्य मन्दाकिनीचित्रकूटवनभूभागस्य।

अस्य प्रदेशस्येति स्मृत्यर्थकर्म्मणीति षष्ठी।

श्रमेति। श्रमो रतिखेदः तेनोत्पादितं यदम्बु घर्म्मजलं तेन शिशिरीभवत् शीतलतां भजमानं मुखविशेषणमेतत्। तथा प्रसृताः प्रवहन्तः मन्दाः अल्पाल्पाः ये मन्दाकिनीमरुतः मन्दाकिनीनद्या वायवः तैः तरलिताः चञ्चलीकृता इतस्ततो विक्षिप्ता इति यावत् ये अलकाश्चूर्णकुन्तलाः स्खलितकेशा इत्यर्थः तैः आकुला व्याप्ता अलङ्कृतेत्यर्थः ललाटरूपस्य चन्द्रस्य द्युतिः शोभा यस्मिन् तत् तथोक्तम्। तथा न कुङ्कुमेन कलङ्कितौ चिह्नितौ इत्यकुङ्कुमकलङ्कितौ तथापि उज्ज्वलौ शोभमानौ कुङ्कुमसम्पर्काभावेऽपि स्वत एव रक्ताभौ इत्यर्थः कपोलौ गण्डौ यस्मिन् तत् तथोक्तम्। तथा निर्गतं विद्यमानं आभरणानि अलङ्कारा ययोस्तौ निराभरणौ तथापि सुन्दरौ यौ श्रवणपाशौ प्रशस्तकर्णयुगलं ताभ्यां सौम्यं सुन्दरं मुखं तव वदनम् उत्प्रेक्षाते सङ्कल्पवशात् चक्षुषोः समीपमानीय आलोक्यत इवेत्यर्थः यथेति शेषः। सङ्कल्पवशात् उत्प्रे-क्षामि ननु साक्षात् द्रष्टुं शक्यते इतीव दारुणं कष्टमिति भावः।

अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशसौम्यं (१) मुखम् ॥३७॥

स्तम्भित इव स्थित्वा सकरुणम् । अहो नु खलु भोः ! । (घ)

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः ।

अत्र प्रकृतस्य तादृशवरणस्य दर्शनात्मना सम्भावनाकरणात् भावाभिमानिनी क्रियोत्प्रेक्षा, सा च इवादिवाचकाभावात् प्रतीयमाना, ललाटचन्द्रेति निरङ्गं केवलं रूपकम्, कुङ्कुमसम्पर्कं रूपहेतुं, विनापि कपोलयोरुज्ज्वलत्वं तथा आभरणरूपकारणा-भावेऽपि कर्णयोः सौन्दर्यमिति विभावना चालङ्कारः, इत्येतेषामङ्गाङ्गिभावेन सङ्करः । छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिश्चानुसन्धेया । सीतायाः कपोलयुगलमीदृशं स्वभाव-लोहितं यत् तत्र कुङ्कुमरागो न शोभां जनयति अपितु दुष्टचिह्नमिव करोतीति कलङ्क-शब्दः पुष्कलो वस्तुध्वनिः ।

"कलङ्कोऽङ्कापवादयो"रित्यमरः । "पाशः शिखादिपूर्वः स्यात् तत्सन्धि कर्ण-पूर्वकः । सुकर्णे च स्वसामर्थ्यात् मृगपक्ष्यादिबन्धने" ॥ इति मेदिनी ।

तरलाः छला इति तरलिताः करोत्यर्थे णिजन्तात् कर्मणि क्तः । प्रशस्तौ श्रवणौ इति श्रवणपाशौ 'प्रशंसावचनै"श्चेत्यादिना समासः ।

पृथ्वी वृत्तम् ॥३७॥

(घ) स्तम्भित इति । स्तम्भितः शोकेन जडीकृतः । अहोनुखलुभोरित्यव्ययं महाविषादसूचकम् । तथा च कालापाः पठन्ति ।

'अयन्त इति संख्यानं निपातानां न विद्यते ।।
प्रयोजनवशादेते निपात्यन्ते पदे पदे ॥'

चिरमिति । चिरं दीर्घकालं ध्यात्वा ध्यात्वा वारं वारं चिन्तयित्वा, निर्माय कल्पनया विरचय्य, पुरतः अग्रतः, निहितः स्थापित इव प्रियजनः प्रणयी लोकः प्रवासे

---

(१) श्रवणदामसुग्धमिति पाठान्तरम् ।

जगज्जीर्णारण्यं भवति हि विकल्पव्युपरमे (१)
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥३८॥

नेपथ्ये । वशिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः
सह वारुन्धत्या शिशुकलहमाकर्ण्य सभयाः ।

विदेशेऽपि विरूद्धकारिऽपीत्यर्थः आश्वासं वियोगकातरस्य परिसान्त्वनं न करोति इति न खलु, अपितु करोत्येवेत्यर्थः । विकल्पस्य तादृशकल्पनाशक्तेः व्युपरमे कुतश्चित् कारणात् निवृत्तौ सति, जगत् भुवनं जीर्णारण्यं पुरातनतया विरलशुष्कपादपप्रायं काननं हि भवति तादृशवनरूपमेव जायते इत्यर्थः; तादृशकल्पनाया अभावेन कल्पनीय-तादृशमूर्त्तेरप्यभावादिति भावः, तदनु तदनन्तरं हृदयं कुकूलानां राशौ तुषानलानां निवहे पच्यत इव तदीयशोकेन क्वथ्यत इव । तीव्रवह्निना दाहे सहसैव दाह्यस्य विध्वंसात् चिराय यातनाऽनुभवो न जायते, मृदुवह्निना दाहे तु सहसा विध्वंसाभावात् क्रमिकदाहेन गरीयसी यातना अनुभूयते इति तद्वदत्रापि तादृशावस्थायां सद्योजातशोकेन मोहो न भवति किन्तु बहुक्षणं यावत् मनस्तापो जायत इत्येतत्प्रतिपादनार्थं सामान्यतो वह्निषु इत्यनुक्त्वा कुकूलानां राशावित्युक्तम् ।

अत्र भावाभिमानि वाक्यं क्रियोत्प्रेक्षा चैव, जगज्जीर्णारण्यमिति समासाभावेऽपि निरङ्गं केवलरूपकञ्च, एतेषां मिथोनैरपेक्ष्यात् संसृष्टिः । अरण्यपदान्वितस्य अवधारणार्थकहिशब्दस्य भवतीत्यनन्तरपाठात् अस्थानस्थपदतादोषः, स च "जगज्जीर्णारण्यं तु भवति सङ्कल्पविरतौ" इति पाठेन समाधेयः ।

"कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले" इत्यमरः ।

ननु प्रियजन आश्वासं करोतीत्यनेनैव निर्वाहे नञ्द्वयोपादानात् 'विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये" इत्यादिवदपुष्टार्थत्वदोष इति चेन्न 'सम्भाव्यमाननिषेधनिवर्त्तने नञ्द्वय"मिति वामनाभिधानात् तेन च अवधारणार्थप्रतिपादनात् ।

शिखरिणी वृत्तम् ॥३८॥

वशिष्ठ इति । शिश्वोः चन्द्रकेतुलवयोः कलहं समरम् आकर्ण्य लोकपरम्परया

---

(१) कल्पनाव्युपरमे, कल्लेऽव्युपरते इति भिन्नौ पाठौ ।

जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजडाः(१)॥३८॥

रामः। कथं भगवन्तावरुन्धतीवसिष्ठौ, अम्बा जनकश्चात्रैव, कष्टं, कथं खल्वेते द्रष्टव्याः। सकरुणं विलोक्य। अहह! तात-

---

श्रुत्वा वशिष्ठः वाल्मीकिः दशरथस्य महिष्यः कौशल्याप्रभृतयः, अथानन्तरं जनकः अरुन्धत्या वशिष्ठभार्यया सहैव सन्तः परसङ्गेऽपावस्य पूर्व्वं दृष्टस्य लवस्य चन्द्रकेतोश्च युद्धेन गुरुतरामङ्गलसम्भवात् भीतिमन्तः सन्तः, विदूरे अतीवविप्रकृष्टदेशे आश्रमो येषां ते विदूराश्रमाः तेषां भावः सा तया, तेषां पक्षे आश्रमाणामतीव दूरवर्त्तित्वादित्यर्थः; श्रमेण विपुलपथागमनखेदेन जडाः नितान्तश्रान्ततया गमनासमर्थप्रायाः, अतएव त्वरितानि शीघ्रगमनाय त्वरान्वितानि मनांसि येषां ते तथोक्ता अपि जराग्रस्तैः वार्द्धकविशिष्टैः जराजीर्णैरित्यर्थः गात्रैरवयवैरुपलक्षिताः चिरेण कालविलम्बेन आगच्छन्ति समराङ्गनमायान्ति। युद्धनिवारणार्थमिति भावः। उदासीनानां केषाञ्चिन्न तु चन्द्रकेतुलवयोः युद्धमवलोक्य तयोरनिष्टाशङ्कया नितरामुद्विग्नानां समाश्वासनात् कस्यचिन्नैरुक्तिरियमिति मन्तव्यम्।

भविष्यदनिष्टत्वप्रकारकं ज्ञानं भयं तच्च गुणपदार्थः; तेनात्र तादृशभयेन सह वशिष्ठादीनां सम्बन्धात् तुल्ययोगिताऽलङ्कारः, चिरेणागमनं प्रति जराग्रस्तावयवत्वं श्रमजडत्वञ्च हेतुरिति पदार्थहेतुकं काव्यलिङ्गञ्च, इत्यनयोः परस्परनिरपेक्षत्वात् संसृष्टिः प्रयोजनाभावेऽपि नियमार्थं कस्य एवशब्दस्य प्रयोगात् अनियमे नियमाख्यदोषः 'सहैतेऽरुन्धत्या" इति पाठे तत् समाधानम्।

द्वितीयाथशब्दो विदूरेत्यादिवाक्यहेत्वन्तरार्थः, खलुशब्दो वाक्यालङ्कारे।
शिखरिणी वृत्तम् ॥३८॥

(२) रामं इति। सम्भावनायां प्रथमः कथं शब्दः। अत्रैव वाल्मीकितपोवन एव उपस्थिता आसन् इति शेषः, हुतु पूर्वस्थानि स्थिता इत्येवशब्दार्थः। कथं केन

---

(१) त्वरितगतयो विश्लथजटा इति पाठान्तरम्।

जनकोऽप्यत्रैवायातीति (१)वज्रेणेव ताड़ितोऽस्मि (२) मन्द-भाग्यः । (८)

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टे वशिष्ठादिभि-
र्दृष्टाऽपत्यविवाहमङ्गलमहे [३] तत्तातयोः सङ्गतम् ।

प्रकारेण द्रष्टव्या मयेति शेषः । अकारणसीतानिर्वासनेन नितान्तापराद्धोऽहं सुख-केभ्यो दर्शयितुं लज्जितोऽस्मीति भावः । अहहेति विषादे । न केवलं वशिष्ठादिः तात-जनकोऽपीत्यपिशब्दार्थः, अत्रैव समरप्राङ्गण एव नतु आश्रमे स्थित इत्येवशब्दार्थः, वज्रेणेव ताड़ितोऽस्मि वज्रताड़ित इव दारुणपीड़ामनुभवामीत्यर्थः । अत्र असम्भवद्वस्तु-सम्बन्धा निदर्शनाऽलङ्कारः । सीताया अभावे तज्जनकस्य यथा गरीयान् शोको मां प्रति कोपश्च, न तथा वशिष्ठादीनां, सुतरां जनकसाक्षात्कार एव मम यथा महोद्वेगपीड़यो: कारणं न तथा वशिष्ठादीनामिति भावः ।

जनकदर्शनेन स्वकीयशोकस्य तीव्रत्वमाह सम्बन्धेति । सम्बन्धस्य विवाहेन रघूणां जनकानाञ्च परस्परसम्पर्कस्य स्पृहणीयतया श्लाघात्वेन वाञ्छनीयतया हेतुना प्रमुदितैः सन्तुष्टैः वशिष्ठादिभिः मुनिभिर्जुष्टे सेविते उपस्थित्या परिपूरिते दृष्टदृष्टैः अपत्यानां पुत्रकन्यानां यत् विवाहमङ्गलं विवाहरूपं शुभं कर्म तस्य महे तन्न-निमित्ते उत्सवे तातयोः तातस्य पितुर्दशरथस्य तातस्य श्वशुरत्वेन पितृस्थानीयस्य जनकस्य च तत् महानन्दपूर्णं सङ्गतं सम्मिलनं दृष्टा इदानीम् ईदृशे एवं विधे महा-नर्थसे निर्वासनेन सीताया हत्यारूपे नृशंसकर्मणि हन्त जाते सङ्घटिते सति ईदृश-दारुणशोकेन नितान्तकातरं पितृसखं तातस्य दशरथस्य मित्रं जनकं पश्यन् अवलो-कयन् अहं किं कथं सहस्रधा सहस्रखण्डप्रकारेण न दीर्णो न विदीर्णो भवामि ।

---

(१) तातजनकस्तु दैवादत्रैवायात इति पाठभेदः ।

(२) क्वचित् एवशब्दो नास्ति । (३) जुष्टं वशिष्ठादिभिः दृष्टाऽपत्यविवाहमङ्गलमहो इति क्वापि पाठः ।

पश्य श्रीहृशमीहृशे पितृसखं वृत्ते महार्थे शखे
दीर्य्यं किं न सहस्रधाऽहमथवा रामेण किं दुष्करम् ॥४०॥

नेपथ्ये। कष्टं भोः! कष्टम्। [ध] [१]

अनुभावमात्रसमवस्थितश्रियं [२]
सहसैव वीक्ष्य रघुनाथमीदृशम्।

अथवा रामेण किं कार्यं दुष्करं कर्त्तुमशक्यमस्ति अपितु किमपि नेत्यर्थः। यः खलु सर्वथा निरपराधां महासतीं सीतां निर्वासयितुमर्हति स्म, स रामः कर्त्तुं न शक्नुयात् ईदृशं निष्ठुरं कार्यं जगत्यां नास्त्येव, सुतरामधुना जनकसाक्षात्कारो रामस्य सुकर एवेति भावः।

अत्र रामस्य सर्वकार्य्यकरणयोग्यतारूपकारणेन दारुणशोकसह्यताकारणरूप-कार्य्यस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः, स च अर्थापत्त्या सङ्कीर्णः।

'मह उद्धव उत्सव" इत्यमरः।

दीर्य्य इति कर्म्मकर्त्तरि प्रयोगः।

शार्दूलविक्रीडितं वृत्तम् ॥४०॥

(ध) नेपथ्य इति। कष्टमित्यादिकमपि पथिमध्यवर्त्तिनः कस्यचिज्जनस्योक्तिः। किं कष्टमित्याह अनुभावेति। मातरः कौशल्यादयः अनुभावमात्रेण केवलेन प्रभावेण केवलेन स्वाभाविकशारीरिकतेजोविशेषेणेत्यर्थः: दीप्तिहीनत्वव्यावर्त्तनार्थं मात्र-पदम्, समवस्थिता विद्यमाना श्रीः कान्तिर्यस्य तं तथोक्तम्, ईदृशं महाशोककृशशरीरं रघुनाथं रामं सहसा अतर्कितभावेन वीक्ष्य अवलोक्य विधुराः शोककातराः सत्यः प्रथमं पूर्वं प्रमूढस्य मूर्च्छितस्य जनकस्य प्रबोधनात् संज्ञालाभात् परस्त्यिवः प्रमोह

---

(१) क्वापि भो इति शब्दो नास्ति। (२) समुपस्थितश्रियमिति पाठान्तरम्।

प्रथमप्रमूढ़जनकप्रबोधनात्
विधुराः प्रमोहमुपयान्ति मातरः ॥४१॥

रामः । हा तात ! हा मातरः ! हा जनक ! । [न]

जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलम् ।
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि ॥४२॥

मूर्च्छाम् उपयान्ति प्राप्नुवन्ति । जनकः प्रथमं दूरतो राममवलोक्य परिचित्य च मूर्च्छितः परञ्च कथञ्चित् प्रबोधितः, ईदृशसमये कौशल्यादयोऽपि तथाविधं तं दृष्ट्वा मुह्यन्तीत्यर्थः । दीर्घकालानन्तरं रामावलोकनेन शोकसागरोद्वेलनादिति भावः ।

अत्र अनुभावमात्रसमवस्थितश्रियमिति भङ्ग्या शोकातुरत्वस्य प्रतीयमानत्वात् पर्य्यायोक्तमलङ्कारः ।

मञ्जुभाषिणी वृत्तम् ॥४१॥

(न) राम इति । तातेति श्वशुरत्वेन पितृस्थानीयस्य जनकराजर्षेः सम्बोधनम् । एकान्ताकुलतया पितृशोकस्याप्युदयात् जनकेति दशरथस्य सम्बोधनम् ।

जनकानामिति । जनकानां जनकवंशीयानां रघूणां रघुवंशीयानाञ्च कृत्स्नं सकलं यत् गोत्रयोरुभयवंशयोर्मङ्गलं दृश्यमानोन्नतिरूपकुशलैककनिदानं सीतायां खलु जातायां जनकानां महानभ्युदय आसीत्, सम्पन्ने च सीतारामयोः परिणये रघुकुलस्यापि कापि समुन्नतिरभवदिति च रामायणे द्रष्टव्यम् । तस्मिन् कल्याणैकनिदाने सीतारूपे वस्तुनि अकरुणे निर्दये नितान्तनिष्ठुरतया सीताया निर्वासनेन हत्याकारिणीत्यर्थः अतएव पापे तद्धत्पापशालिनि मयि वो युष्माकं करुणा दया दयया अभिसम्पातादिना शान्तिविधानाभाव इत्यर्थः वृथा निष्फलः कृपया रचितेन मया तद्दुःखनिवारणासम्भवात् युष्माकं मयि करुणाकरणमनर्थकमेवेत्यर्थः । मम तत्पापस्य योग्यशास्तिविधानमेव युष्माकमुचितमिति भावः ।

अत्र पापं प्रति अकरुणत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

अपतितभार्य्यादिपरित्यागे पातित्यजनकहत्पापमाह प्रायश्चित्तविवेके गौतमः

यावत् सम्भावयामि [१] । इत्युत्तिष्ठति । [प]

कुशलवौ । इत इतस्तातः । [फ]

सकरुणं परिक्रम्य निष्क्रान्ताः सर्वे ।

—):०:(—

इति कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः । (ब)

'पतिताऽत्याज्यपतितत्यागिनश्च पतिता" इति ॥४२॥

(प) यावदिति । वाक्यालङ्कारे यावच्छब्दः । सम्भावयामि स्वयं गत्वा अभ्यर्थयामि, अथवा आश्वासयामि, मातृप्रभृतीनिति शेषः ।

(फ) कुशेति । तातः पितृस्थानीयो भवान् राम इत्यर्थः; इत इतः अनेन अनेन पथेत्यर्थः आगच्छतु इति शेषः । इत इति तृतीयान्तात् तस् प्रत्ययः ।

(ब) इतीति । कुमारयोः कुशलवयोः प्रत्यभिज्ञानं स्वकीयपुत्रत्वेन परिज्ञानं यत्र सः । नाम कुमारप्रत्यभिज्ञाननाम्ना प्रसिद्धः, षष्ठोऽङ्कः समाप्त इति शेषः ।

इति श्रीहरिदाससिद्धान्तवागीशविरचितायामुत्तररामचरितटीकायां
सर्वार्थबोधिनीसमाख्यायां षष्ठाऽङ्कविवरणं समाप्तम् ॥०॥

——:०:——

---

(१) यावत् सम्भावयामीति पाठः क्वापि नास्ति ।

सप्तमोऽङ्कः ।

ततः प्रविशति लक्ष्मणः ।

लक्ष्मणः । भो भोः ! अद्य खलु [१] भगवता वाल्मीकिना सब्रह्मक्षत्रपौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुरतिर्य्यगुरगनायकनिकायो जङ्गमः स्थावरश्च भूतग्रामः स्वप्रभावेण सन्निधापितः। आदिष्टश्चाहमार्य्येण, "वत्स! लक्ष्मण! भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टु-

---

(क) लक्ष्मण इति। भो भो इति सहचराणां सम्बोधनम्। ब्रह्मभिः ब्राह्मणैः क्षत्रैः क्षत्रियैः, गोवृषन्यायात्, अन्यमानवजातिभ्यो ब्रह्मक्षत्रयोः प्राधान्यख्यापनार्थं पृथगुपादानं, पौरैः पुरवासिभिः जानपदैः प्रदेशवासिभिश्च सह वर्त्तमाना इति तथोक्ताः, प्रजाः जनान्, अस्माभिः राज्ञा राजपरिवारवर्गैश्च सह, आहूय आमन्त्र्य, कृत्स्न एव समग्र एव, देवाश्च असुराश्च तिरश्चां पशुपक्षिणां उरगाणां सर्पाणाञ्च नायकाः श्रेष्ठाश्च ते तथोक्ताः, तेषां निकायेन समूहेन सह वर्त्तमान इति स तथोक्तः, जङ्गमो गतिशीलः कीटादिः, स्थावरः स्थितिशीलः पर्वताद्यधिष्ठातृदेवतादिश्च भूतग्रामः प्राणिसमूहः उक्तदेवासुराद्यात्मक इत्यर्थः, स्वप्रभावेण स्वकीयतपोमाहात्म्येन सन्निधापितः उपस्थापितः। जगतः सर्वेषां सर्वविधप्राणिनामेकत्र समावेशस्य असम्भवता न केनचिदाशङ्कनीया उग्रतपसः सर्वेषामचिन्तनीयप्रभावदर्शनादिति भावः। अपिचेति चार्थः। आर्य्येण माननीयेन रामचन्द्रेणेत्यर्थः। स्वकृतिम् आत्मना विरचितं किमपि दृश्य-

---

(१) अद्य खल्विति पाठः क्वापि नास्ति।

मुपनिमन्त्रिताः स्मः, तद्गङ्गातीरमातोद्यस्थानमुपगम्य (१) क्रियतां समाजसन्निवेश इति। कृतश्च मर्त्त्यामर्त्त्यस्य भूतग्रामस्य समुचितस्थानेषु समुपवेशनं[२]मया। अयन्तु [क]

काव्यमित्यर्थः अप्सरोभिः उर्वशीप्रभृतिदेववाराङ्गनाभिः प्रयुज्यमानाम् अभिनीयमानाम् द्रष्टुम् उपनिमन्त्रिता आहूताः वयमित्यर्थः। तत्तस्मात् बहुकोटिप्राणिनामवस्थाने महाविपुलायतनस्थानस्यावश्यकत्वादित्यर्थः, आतोद्यस्थानं वीणादिवाद्यस्थानं रङ्गभूमिमित्यर्थः उपगम्य गत्वा समाजसन्निवेशः सभास्थापनं सर्वेषां यथायोग्यस्थानोपवेशनमित्यर्थः क्रियतां, इति इत्यनेन आदिष्ट इत्यन्वयः। मयापि तत्तौदासीन्यं न कृतमित्याह कृतश्चेति। आदिष्टसमुच्चये चकारः। समुचितस्थानेषु सर्वथा योग्यासनेषु, मर्त्त्यो मरणधर्म्मा मनुष्यादिः अमर्त्त्यो मरणहीनो देवगणः तस्य मर्त्त्यामर्त्त्यस्य विनश्वराविनश्वरात्मकस्येत्यर्थः भूतग्रामस्य प्राणिसमूहस्य समुपवेशनम् आसनग्राहणम्। तेन मत्सहचरा भवन्तोऽप्युपविशन्त्विति भावः।

'ब्रह्म तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि। ऋत्विग्योगभिदोर्विप्रे" इति मेदिनी।

'नायको नेतरि श्रेष्ठे हारमध्यमणावपी"ति वैजयन्ती।

'संघातेऽपि ग्रामो भूतेन्द्रियशब्दविषयकरणाना"मिति हलायुधः।

'निकायस्तु पुमान् लक्ष्ये सधर्म्मिप्राणिसंहतौ। समुच्चये संहतानां निलये परमात्मनो"ति मेदिनी। 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम्। चतुर्विधमिदं वाद्यं वादित्रातोद्यनामक"मित्यमरः।

स्वकृतिमिति 'भावविहितः कृत्प्रत्ययो द्रव्यवत् प्रकाशत" इति न्यायात् स्वरचितदृश्यकाव्यम्, कर्म्मणि क्तिप्रत्ययो वा।

तपसः फलमाह तिथितत्त्वधृतं वचनं—

'तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्वतः।
दुर्भगत्वं वृथा लोको वहते सति साधने॥"

---

(१) तद्भागीरथीतीरमनोज्ञस्थानमुपगम्य इति पाठान्तरम्।

(२) समुचितस्थानेषु समुपवेशसङ्गः, समुचितस्थानसन्निवेश इति पाठभेदौ।

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः ।
वाल्मीकिगौरवादार्य्य इत एवाभिवर्त्तते ॥१॥

ततः प्रविशति रामः ।

रामः। वत्स लक्ष्मण ! अपि स्थिता रङ्गप्रेक्षकाः ? । (ख)

लक्ष्म। अथकिम् । (ग)

रामः। इमौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशीं स्थान-प्रतिपत्तिं लम्भयितव्यौ । (घ)

लक्ष्म। प्रभुस्नेहप्रत्ययात्तथैव कृतम् । इदन्त्वास्तीर्णं राजासनम्, उपविशत्वार्य्यः । (ङ)

राज्येति । राज्यं राजत्वमेव आश्रमः राजत्वकरणालम्बनीभूतहृदयस्थ आश्रम इत्यर्थः तस्मिन् निवासेऽपि अवस्थानेऽपि सति प्राप्तं स्वीकृतं कष्टं दुःखकरं मुनिव्रतं ब्रह्मचर्य्यादिको मुनिनियमो येन स तथोक्तः, आहारविहारादिविविधभोगसाधनसामग्री-सत्त्वेऽपि ततो निवृत्त इत्यर्थः । आर्य्यो रामः वाल्मीकेर्गौरवात् गौरवप्रसूतभक्तिवशादि-त्यर्थः, इत एव अत्रैव स्थाने न तु रङ्गदर्शनेन मनःस्फूर्त्तिविधानार्थमिति भावः ।

अत्र नियतिवशेन समाधानात् विरोधाभासोऽलङ्कारः ॥१॥

(ख) राम इति । अपि प्रश्ने । रज्यतेऽस्मिन्निति रङ्गः अभिनयस्थानं तस्य प्रेक्षकाः दर्शकाः अभिनयदर्शनोत्सुका इत्यर्थः, स्थिताः यथास्थाने उपविष्टाः किमित्यर्थः ।

(ग) लक्ष्मेति । अथ किमित्येकं स्वीकारार्थमव्ययमित्यसकृदुक्तम् ।

'अथकिम् । स्वीकार' इति शब्दकल्पद्रुमः ।

(घ) राम इति । अप्रथमे पुनःशब्दः । चन्द्रकेतोः सदृशी तुल्या तां स्थानप्रतिपत्तिम् उपवेशनस्थानलाभं लम्भयितव्यौ प्रापणीयौ । यादृशासने चन्द्रकेतुरुपविष्टः तादृश एव राजकुमारयोग्यासने कुशलवावुपवेशयेत्यर्थः ।

(ङ) लक्ष्मेति । प्रभोरधीश्वरस्य भवतः स्नेहप्रत्ययात् कुशलवौ प्रति वात्सल्य-

रामः उपविशति । सर्वे चोपविशन्ति । (च)

लक्ष्मणः । प्रस्तूयतां भोः ! । (छ)

प्रविश्य सूत्रधारः । भो भोः ! भगवान् भूतार्थवादी प्राचेतसः सजङ्गमस्थावरं जगदाज्ञापयति, यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनं करुणाद्भुतरसञ्च (१) किञ्चिदुपनिबद्धं, तत्र कार्य्यगौरवा (२)दवधातव्यमिति । (ज)

मस्तीति विश्वासात् तथैव चन्द्रकेतुसदृशस्थानमेव कृतं कुशलवयोरुपवेशनायेत्यर्थः कल्पितम् । तु किन्तु इदमयतो दृश्यमानं राजासनं राजोचितम् उर्वः, बहुमूल्यमासनमित्यर्थः आस्तीर्णं विस्तीर्णं कल्पितमित्यर्थः । आर्य्यो भवान् उपविशतु तवासन इति शेषः ।

(च) राम इति । राज्ञः प्राक् प्रजानामुपवेशनस्यान्याय्यत्वात् रामोपवेशनानन्तरं सर्वे चोपविशन्तीत्युक्तम् । सर्वे सभ्याः ।

(छ) लक्ष्मणेति । भो इति नटानां सम्बोधनम् । प्रस्तूयताम् आरभ्यतां विज्ञापितनाटकाभिनय इति शेषः । पुस्तकान्तरे रामोक्तिरियम् ।

(ज) गर्भाङ्कमवतारयति प्रविश्येति । भो भो इति उपस्थितसामाजिकानां सम्बोधनम् । भूतं सत्यम् अर्थं वदितुं शीलमस्येति भूतार्थवादी सर्वदा यथार्थवादी प्राचेतसो वाल्मीकिः सजङ्गमस्थावरं सचराचरम् । आज्ञापयति आदिशति महर्षीणां सर्वमाननीयतया सर्वेष्वेव आदेशसम्भवादिति भावः । आर्षेण ऋषियोग्येन त्रिकालदर्शिना ज्ञाननेत्रेनेत्यर्थः, समुद्वीक्ष्य यथायथतया विज्ञाय, पावनं पवित्रं, करुणः शोकोद्दीपकः अद्भुतो विस्मयकारश्च रसौ यत्र तत्, किञ्चिद्दृश्यकाव्यम् उपनिबद्धं रचितम् । तत्र दृश्यकाव्ये तदभिनय इत्यर्थः कार्य्यगौरवात् अभिनेयवस्तुनो गुरुत्वेन अनवद्यत्वात् अवधातव्यं मनःसंयोगः कर्त्तव्यः सर्वैर्भवद्भिरिति शेषः इति इत्यन्तम् आज्ञापयतीत्यन्वयः ।

'युक्तौ आदावते भूतं प्राण्यतीते त्रिषु विष्विव्'त्यमरः ।

---

(१) पावनकरुणाद्भुतरसमिति पाठान्तरम् ।

(२) काव्यगौरवादिति पाठभेदः ।

रामः। एतदुक्तं भवति। साक्षात्कृतधर्म्माणो महर्षयः, तेषामृतम्भराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिद्व्याहन्यन्त इत्यनभिशङ्कनीयानीति।(झ)

नेपथ्ये। हा अज्जउत्त! हा कुमार लक्खण! एआइणीं मन्दभाइणीं असरणं अरण्णे आसण्णप्पसववेअणं हदास सावदा मं अहिलसन्ति, साहं दाणिं मन्दभाइणी भाईरहीए अत्ताणं णिक्खिवेमि। [१] [ञ]

(ञ)। हा आर्य्यपुत्र! हा कुमार लक्ष्मण! एकाकिनीं मन्दभागिनीमशरणाम् अरण्ये आसन्नप्रसववेदनां हताशां श्वापदा मामभिलषन्ति, साहमिदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षिपामि।

(झ) राम इति। एतत् 'यदिदमस्माभि' रित्यादिवाल्मीकिवचनस्य तात्पर्य्यमित्यर्थः उक्तं विवृतं भवति मयेति शेषः। अस्य वाल्मीकेरादेशस्य तात्पर्य्यमहं बिभ्यतो ते सरलार्थः। किन्तत् विवरणमित्याह साक्षादिति। साक्षात्कृतधर्म्माणः प्रत्यक्षीकृतधर्म्ममूर्त्तयः। ऋतं सत्यमेव सारः स्थिरांशः उत्कृष्टभागो येषां तानि, निर्वाधपर्य्यवसितानीत्यर्थः रजसो रजोगुणात् पराणीति परोरजांसि केवलसत्त्वमयानीत्यर्थः प्रज्ञानानि प्रकृष्टतत्त्वज्ञानानि क्वचित् भूते भविष्यति वर्त्तमाने वा काले, दूरे व्यवधाने वा देशे न व्याहन्यन्ते व्याहतानि न रुद्धानि भवन्ति, सर्व्वत्रैव यथायथं वस्तु उपस्थापयन्तीत्यर्थः, इति हेतोः अनभिशङ्कनीयानि यथायथभावेन वस्तुप्रख्यापकत्वेन संशयितव्यानि। अतो वाल्मीकिना यदुपनिबद्धं तस्य सत्यत्वे न केनापि संशयितव्यमिति भावः।

परोरजांसीति राजदन्तादित्वात् परनिपातः, "अपस्करादय" इति सुट्।

'ज्ञानान्मुक्ति' रिति सांख्यसूत्रम्।

(ञ) नेपथ्य इति। न विद्यते शरणं रक्षिता यस्यास्ताम् अशरणाम्। आसन्नप्रसववेदनाम् उपस्थितप्रसवव्यथां, हताशां जीवनाशारहितां मां, श्वापदाः व्याघ्रादयो

(१) णिक्खिविस्सिमिति पाठान्तरम्।

लव । आत्मगतम् । कष्टं बतान्यदेव किमपि । (ट)

सूत्र । विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने ।
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति ॥२॥

इति निष्क्रान्तः । (ठ)

हिंस्रजन्तवः, अभिलषन्ति खादितुमिच्छन्ति । भागीरथ्यां गङ्गाजले, आत्मानं देहं निक्षिपामि विसृजामि । जीवनरक्षायामुपायाभावात् हिंस्रजन्तुकर्तृकभक्षणापेक्षया गङ्गाया आश्रयः श्रेयानिति भावः । रामचन्द्रादिभ्यात् अरण्ये परित्यज्य लक्ष्मणे प्रस्थिते सति सीताया उक्तिरियम् ।

'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरः ।

(ट) कष्टमिति । बतेति खेदसूचकमव्ययम् । अन्यदेव चिन्तितविषयात् भिन्नमेव, किमपि अनिर्वचनीयम् इदमभिनेतुमारभ्यते इति शेषः । कोऽपि प्राचीनो विस्मयकर विषयोऽभिनेतव्य इति पूर्वं मयाभिचिन्तित इति भावः । लक्ष्मणनामकस्य अन्यस्यापि सम्बोधनसम्भवात् नेपथ्यात् कस्योक्तिरियमिति निर्णयाभावात् कस्य विषयस्याभिनयो भविष्यतीति इदानीमपि रामलक्ष्मणादयो निर्णेतुं न शक्नुवन्ति इति प्रत्येतव्यम् ।

विश्वेति । राज्ञा रामेण महावने गहनारण्ये त्यक्ता विश्वम्भरात्मजा पृथिवीकन्या देवी सीता प्राप्तप्रसवम् उपस्थितगर्भमोचनकालम् आत्मानं देहं गङ्गादेव्यां गङ्गाजले विमुञ्चति निक्षिपति । अत एव नेपथ्यात् हा अज्जउत्तेत्यादि सीताया उक्तिरिति भावः । गङ्गादेव्यामित्यनेन नेयं सीताया आत्महत्या अपि तु आत्मरक्षार्थमेव गङ्गायाः शरणापन्नता इति ध्वन्यते, तेनात्र शब्दशक्तिमूलो वस्तुध्वनिः ॥२॥

(ठ) इतीति । निष्क्रान्तः सूत्रधार इति शेषः । एतदन्ता गर्भाङ्कस्य प्रस्तावना ।

सूत्रधारेण वाल्मीकिप्रणीतप्रबन्धस्य विश्वसनीयत्वप्रयोगे प्रयुज्यमाने नेपथ्यात् सीताविलापमाकर्ण्य तस्या गङ्गायामात्मनिक्षेपरूपप्रयोगान्तरस्य प्रयुक्तत्वात् तेन च एष्यत्गङ्गासीतानां प्रवेशादियमपि प्रस्तावना प्रयोगातिशयरूपा । प्रवर्त्तकरूपेति सूचित । वस्तुतस्तु देहत्यागव्यापनाय लक्षणान्तरकरणमुचितमासीदालङ्कारिकाणाम् ।

रामः । देवि! क्षणमपेक्षस्व । (ड) (१)

लक्ष्म । आर्य्य ! नाटकमिदं नाटकमिदम् । (ढ) (२)

रामः । हा देवि! दण्डकारण्यवासप्रियसखि! एष ते रामाद्दैवदुर्विपाकः । (ण)

लक्ष्म । आर्य्य! दृश्यतां तावत् प्रबन्धार्थः । (३)

रामः । एष सज्जोऽस्मि वज्रमयः । (थ)

*ततः प्रविशतुरतसङ्गितं कैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता । (द)

(ड) राम इति । अपेक्षस्व विलम्बस्व । अहमपि तवानुवर्त्ती भवामीति वाक्यशेषः । इदानीन्तु विश्वम्भरेत्यादिना सूत्रधारेण सीताया निर्देशात् रामस्यायं विलाप इति बोध्यम् ।

(ढ) लक्ष्मणेति । नाटकमिदम् अभिनयः खल्वेष इत्यर्थः । नतु वस्तुत एव सीता गङ्गायामात्मानं विमुञ्चतीति तदर्थं विलापो नोचित इति भावः । अवधारणे द्विरुक्तिः ।

(ण) राम इति एष गङ्गायामात्मनिक्षेपः । दैवदुर्विपाकः भाग्यस्य कराल फलम् । महारण्ये साहाय्याय सहचरीभूताया एव तवायं दुर्विपाको मयैव विहित इति मत्तो जगत्यां कोऽपि कृतघ्नो नास्तीति भावः ।

(त) लक्ष्मणेति । प्रबन्धार्थः दृश्यकाव्यविषय इति यावत् । सम्यक्, परतः शुभमेव भविष्यतीति भावः ।

(थ) राम इति । वज्रमयः वज्रवत् कठिनहृदयः अयमन्यथा विदीर्णहृदयो न भवानिति भावः । सज्जः अभिनयदर्शनार्थं दत्तावधानः ।

(द) तत इति । उत्सङ्गितः क्रोडं कृतः एकैको दारकौ बालको याभ्यां

---

(१) हा देवि! हा देवि! लक्ष्मण ? अवेक्षस्व इति पाठभेदः ।

(२) क्वचित् द्विरुक्ति र्नास्ति ।

रामः । वत्स लक्ष्मण ! असंविज्ञातमनिबन्धनं तम इव प्रविशामि, धारय माम् । (ध)

गङ्गा (१) । समाश्वसिहि कल्याणि ! दिष्ट्या वैदेहि ! वर्द्धसे ।
अन्तर्जले प्रसूतासि रघुवंशधरौ सुतौ ॥३॥

सीता । समाश्वस्य । दिट्ठिआ दारए पसूदह्मि, हा अज्जउत्त ! । इति मूर्च्छति । (न)

(न) दिष्ट्या दारकौ प्रसूतास्मि, हा आर्य्यपुत्र ! ।

• ताभ्याम् । अवलम्बिता धृता । उत्सङ्ग उत्सङ्गसम्बन्धः क्रोड़े समारोप इत्यर्थः जातोऽस्येति उत्सङ्गितः तारकादित्वादितच् ।

(ध) राम इति । असंविज्ञातम् अज्ञातपूर्वम्, अनिबन्धनम् अहेतुकम् अतर्कितमुपस्थितमित्यर्थः तमोऽन्धकारम् । मोह आगत इत्यर्थः । सीताभिनयदर्शनेन शतधा शोकोद्वेलनादिति भावः ।

गङ्गेति । हे कल्याणि ! मङ्गलभूते, वैदेहि ! सीते, समाश्वसिहि आश्वस्ता भव वर्द्धसे भाग्येन पुत्रसम्पन्नासि, रघुवंशधरौ रघुकुलरक्षकौ सुतौ पुत्रद्वयम् अन्तर्जले जलमध्ये प्रसूतासि उत्पादितवती ।

अत्र आश्वासं प्रति पुत्रप्रसवो हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

जलस्यान्तः इति अन्तर्जलमित्यव्ययीभावः । प्रसूतेति आदिकर्म्मविवक्षया कर्त्तरि क्तः ॥३॥

(न) सीतेति । पुत्रप्रसवमाकर्ण्य सीतायाः चेतसि एवमभूत् गर्भोत्पत्तिनातमहानन्दित आर्य्यपुत्रश्चेदत्र सन्निहितो भवेत् तदा तस्य कियानानन्दो भवेत् ततश्च रामस्मरणेन शोकसागरोद्वेलनात् आर्य्यपुत्रेति सम्बोधनं मूर्च्छा चेति बोध्यम् ।

(१) देव्यौ इति क्वापि पाठः ।

लक्ष्म। पादयोर्निपत्य। आर्य्ये ! आर्य्ये ! दिष्ट्या वर्द्धामहे, कल्याणप्ररोही रघुवंशः। विलोक्य। हा ! हा ! कथं क्षुभितवाष्पोत्पीड़निर्भरः प्रमुग्ध एवार्य्यः। इति वीजयति। (प)

पृथ्वी। वत्से ! समाश्वसिहि समाश्वसिहि।

सीता। आश्वस्य। भअवदि ! का तुमं इअं अ। (फ)

पृथ्वी। इयन्ते श्वशुरकुलदेवता भागीरथी। (ब)

सीता। भअवदि ! णमो दे णमो दे। (भ)

भागी। चारित्रोपचिता कल्याणसम्पदमधिगच्छ। (म)

लक्ष्म। अनुगृहीताः स्मः। (य)

(फ) भगवति। का त्वमियञ्च।

(भ) भगवति ! नमस्ते नमस्ते।

(प) लक्ष्मणेति। आर्य्ये आर्य्येति हर्षे द्विरुक्तिः। कल्याणः मङ्गलकरः प्ररोहः अङ्कुरः करीरश्च यस्य सः, रघुवंशः रघुकुलं वंशदण्डश्च। अत्र श्लिष्टपरम्परितरूपकमलङ्कारः। विलोक्य राममिति शेषः। क्षुभित उद्वेलितो यो वाष्पोत्पीड़ः अश्रुराशिस्तेन निर्भरः परिपूर्णः, प्रमुग्ध एव मूर्च्छित एव। स्वप्नोक्तव्यवस्थापने एवशब्दः। एवं नलिनयदर्शनाय एकाग्रचित्तो लक्ष्मणो रामस्य मोहं नावगतः, पश्चात्तमवगम्य लक्ष्मणस्य हा इत्याद्युक्तिरिति बोध्यम्।

वीजयति व्यजनेन वायुं सञ्चालयति। वीजधातुश्चुरादिरदन्तः।

(ब) पृथ्वीति। श्वशुरकुलदेवता सगरवंशोपास्या उपासनया सगरवंशं प्रत्यनुग्रहकारिणीत्यर्थः।

(म) भागीति। चारित्रेण पातिव्रात्यरूपेण सदाचारेण उपचितां वर्द्धितां कल्याणसम्पदं सर्वविधमङ्गलसम्प्राप्तिम् अधिगच्छ लभस्व।

चरित्रमेव चारित्रं प्रज्ञादित्वात् स्वार्थे अण्।

(य) लक्ष्मणेति। अनुगृहीताः दयावलोकिताः। गङ्गाकृताशीःफलस्यात्र रक्षाविलात् सीताकल्याणात् कल्याणयोरभिन्नत्वादिति भावः।

भागी । इयन्तु ते जननी वसुन्धरा । (र)*(१)

सीता । हा अम्ब ! ईदिसो अहं तुए दिट्ठा । (ल)

पृथ्वी । एहि वत्से ! एहि पुत्रि ! । इति सीतामालिङ्ग्य मूर्च्छति । (व)

लक्ष । सहर्षम् । दिष्ट्या पृथ्वीभागीरथीभ्यामभ्युपपन्नार्य्या । (श)(२)

रामः । अवलोक्य । करुणतरं खल्वेतद्वर्त्तते । (ष)

भागी । विश्वम्भराऽपि नाम व्यथत इति जितमपत्यस्नेहेन यद्वा सर्वसाधारणो ह्येष मोहग्रन्थिरन्तश्चेतनावतामनुपप्लवः संसारतन्तुः । वत्से वैदेहि ! देवि भूतधात्रि ! समाश्वसिहि समाश्वसिहि । (स)

(ल) हा अम्ब ! ईदृशी अहं त्वया दृष्टा ।

(र) भागीति । तुशब्दो भागीरथ्या भेदप्रतिपादनार्थः । "तु स्याद्भेदेऽवधारणे" इत्यमरः ।

(ल) सीतेति । ईदृशी चरित्रदोषापवादेन निर्वासितेत्यर्थः । चरित्रापवादेन परिभूताया जनन्यादिदर्शनम् अतीवलज्जाविषादकरमिति भावः ।

(व) पृथ्वीति । वत्से पुत्रीति द्विविधसम्बोधनं स्नेहातिशयद्योतकम् । सीतादुःखेन तादृशदुःखितत्वात् मूर्च्छति बोध्यम् ।

(श) लक्ष्मेति । अभ्युपपन्ना प्राप्ता आर्य्या सीता । अशरणस्य शरणप्राप्तिरतीव श्लाघ्येति भावः ।

(ष) राम इति । अवलोक्य पृथ्वीभागीरथीभ्यां सीताप्राप्तिमिति शेषः । एतत् पृथ्वीगङ्गाभ्यां सीताया आश्रयदानं करुणतरं ममातीवशोकोद्दीपकमित्यर्थः । सर्वाश्रयकरुणाभ्यां मम भार्य्याया अपरिहार्याश्रयदानादिति भावः ।

(स) भागीति । विश्वं सर्वं बिभर्त्तीति विश्वम्भरा साऽपि विश्वधारणव्यापारेण सर्वंसहाऽपीत्यर्थः व्यथते आत्मजायाः सीताया दुःखेन दुःखमनुभवतीति इति हेतोः, अपत्यस्नेहेन सन्तानवात्सल्येन जितं सर्वोत्कर्षेण स्थितम् । सर्वसहाया • अपि

(१) क्वचित् तुशब्दो नास्ति । (२) पृथ्वीगङ्गाभ्यामिति पाठान्तरम् ।

पृथिवी । देवि ! सीतां प्रसूय कथमाश्वसिमि । (ह)

एकश्चिरं राक्षसमध्यवासः

साङ्गो, द्वितीयश्च सुदुःश्रवोऽस्याः । (१)

भागी । को नाम पाकाभिमुखस्य जन्तुः (२)

द्वाराणि दैवस्य पिधातुमीष्टे ॥४॥

पृथिव्याः पुत्र्याः सीतायाः दुःखेन दुःखानुभवदर्शनात् अपत्यस्नेह एव सर्वान्तःकरण-वृत्तीनां चैतन्यमपि मनोमयं प्रकरणम् । एतमर्थं समर्थयति यदिति । हि तथाहि, एष अपत्यस्नेहरूपी सौहार्दः सर्वसाधारणः सर्वेषां देवासुरादिप्राणिनां जातानः अविशेषेण वर्तमान इति यावत् चेतनावतां प्राणिनां अन्तरः मनोवर्त्ती, अनुपप्लवः दुर्भेदः संसारस्य तन्तुः बीजकसूत्रम् । एतदभावे मातादीनां बाल्यापत्यादि रक्षणाभावेन सर्वमेव सर्वं नश्यतीति भावः । भूतधात्रि प्राणिनां धारणकर्त्रि ।

अत्रापत्यस्नेहे तन्तुत्वारोपस्य प्रकृतापत्यस्नेहप्राधान्योपयोगितया परिणामालङ्कारः ।

(ह) पृथिवीति । प्रसूय उत्पाद्य । सीतादुःखेनैव सर्वदा दुःखानुभवात् कदापि आश्वासो नास्त्येवेति भावः ।

सीताया दुःखं विवरीतुमाह एक इति । अस्याः सीतायाः, एकस्तावत् चिरं बहुकालं व्याप्य राक्षसानां मध्ये रावणेनापहरणानन्तरं लङ्कायामशोकवने इत्यर्थः वासः अवस्थानं वासजनितं भीषणदुःखमित्यर्थः, साङ्गः शेषाङ्गैः अलीकरामलक्ष्मण-निधनवार्त्ताश्रवणादिजनितसन्तापैः सह वर्त्तमान इति साङ्गः परिसमाप्त इत्यर्थः, द्वितीयो लोकापवादकृतः परित्यागः सुदुःश्रवः चरित्रदोषापवादेन विहितत्वात् कुत्सया साधुजनेन श्रोतुमशक्यः । इदन्तु पूर्वस्मादपि घोरतरं दुःखमिति भावः ।

नाम सम्भावनायां । को जन्तुः प्राणी पाकाभिमुखस्य परिणामोन्मुखस्य फलोत-पादनप्रवृत्तस्य इत्यर्थः दैवस्य नियतेः द्वाराणि प्रसरणमार्गान् पिधातुं आच्छादयितुं अवरोद्धुमिति यावत् ईष्टे प्रभवति शक्नोति अपितु कोऽपि नेति तात्पर्य्यम् । सीताया ईदृशी दुःखपरम्परा नियतिविहितेति न तदर्थं सन्तापः करणीय इति भावः ।

(१) त्यागो द्वितीयश्च सुदुःसहोऽस्या इति पाठान्तरम् । (२)जन्तोरिति पाठभेदः ।

पृथिवी । भागीरथि ! सदृशमुक्तम् । दुराचरितं रामभद्रस्य (क)

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ।
नाहं न जनको नाग्निर्नानुवृत्तिर्न सन्ततिः ॥५॥

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, [illegible] सङ्कीर्यन्ते ।

फलोत्पादनप्रवृत्तः पूर्वमवगतस्य दुर्दैवस्य समापनादिना शान्तिरपि विधातुं शक्यते फलोत्पादनप्रवृत्तस्य तु कथमपि नेति प्रतिपादयति पाकाभिमुखस्य दुरितम् । विधातुमिति "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अपिशब्दस्य अकारलोपः ।

इन्द्रवज्रावृत्तम् ॥४॥

(क) पृथिवीति । सदृशं योग्यमुक्तं त्वयेति शेषः । दैवस्य बलवत्तया सीताया अयं दुर्गतिरिति स्वीकरोमीति भावः । एतार्थे वाशब्दः "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वप्रकाशदर्शनात् । रामभद्रस्य एतत् अकारणम् सीताया निर्वासनं युक्तमुचितमित्यभूत् विपरीतलक्षणया नितान्तमनुचितमभूदित्यर्थः विपरीतलक्षणाऽन्यत्रापि यथा "उपकृतं बहु तत्र किमुच्यते" इति साहित्यदर्पणे । उपकृतम् अपकृतमिति तत्रार्थः ।

सीतानिर्वासनस्यायुक्तत्वं प्रतिपादयति, नेति । बाल्ये शैशवे नवयौवने इति तात्पर्यं, बालेन शिशुना नवयुवकेनेत्यर्थः रामेण पीडितः गृहीतः पाणिः न प्रमाणीकृतः नापेक्षितः । यथाशास्त्रं परिणीतायाः सच्चरित्रायाः भार्य्यायाः परित्यागो लोकशास्त्रगर्हितत्वात् नितान्तमनुचित इति भावः । अहं पृथिवी च प्रमाणीकृता न विश्वस्तत्वेन स्वीकृता । मणिकाञ्चनतायाः इव पृथिवीसुतायाः कथं चरित्रदोषः स्यात् इत्यसंविचार्य्यैव परित्यागात् मां प्रत्यपि अविश्वासो निहित इति भावः । जनको राजर्षिरपि न प्रमाणीकृतः विशुद्धत्वेन स्वीकृतः, विशुद्धस्य पितुः कन्या न खलु चरित्रदोषदुष्टेति चरित्रदोषस्य आकरदुष्टत्वाऽनुमापितत्वादित्यगणयित्वा निर्वासनात् जनकोऽप्यपमानित इति तदपि सुतरामनुचितमिति भावः । अग्निरपि न प्रमाणीकृतः न [illegible] स्वीकृतः, लङ्कायामग्निपरीक्षाकाले भगवानग्निर्देवः सीता परमसच्चरित्रेति सर्वसमक्षमभिहि

सीता । हा अज्जउत्त सुमराविदह्मि । (ख)

पृथिवी । आः कस्तवार्य्यपुत्रः ? । (ग)

सीता । सलज्जास्रम् । जहा वा अम्बा भणादि । (घ)

रामः । अम्ब ! पृथ्वि ! ईदृशोऽस्मि । (ङ)

(ख) हा आर्य्यपुत्र स्मारितास्मि ।

(घ) यथा वा अम्बा भणति

तत्त्वात् किन्तु अपरिवादोषिणैव निर्वासनात् अर्थैरपि मिथ्यावादित्वं सूचितमिति तदपि सहृदयुक्तमिति भावः । अनुवृत्तिः । विवाहसमयात् प्रभृति आनुगत्यमपि न प्रमाणीकृता निर्दोषतायाः कारणत्वेन न स्वीकृता । दुःचरिता ईदृशमानुगत्यं कर्त्तुं कथमपि नार्हतीत्यविचार्य्यैव कृतं निर्वासनमेकान्तमसङ्गतमिति भावः । सन्ततिरपि न प्रमाणीकृता अपत्यमपि नापेक्षितम् । गर्भवत्या निर्वासिताया मरणावश्यम्भाविन सति सन्तानानामभावसम्भावात् वंशलोपकारणं निर्वासनं स्वयमेव कृतमित्यतो कृतमर्यां किमनुचितमस्तीति भावः ।

अत्र एकया प्रमाणीकृतक्रियया पाण्यादीनामनेकेषां कर्म्मतयाऽभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः, स तासामप्रमाणस्यानुचितत्वं प्रति बहुकारणनिर्द्देशात् समुच्चयं त्वनयोरङ्गाङ्गिभावेन सङ्करः ॥२॥

(ख) सीतेति । स्मारिता रामभद्रस्य सुखायितयन्त्या अनन्या पृथिव्येति शेषः ।

(ग) पृथिवीति । आः इति कोपसूचकमव्ययम् । तव आर्य्यपुत्रः कः अपितु कोऽपि नेत्यर्थः । रामो यदि तवार्य्यपुत्रोऽभविष्यत् तदा कथमपि न निरपराधां त्वां निरवासयिष्यदिति भावः ।

(घ) सीतेति । वा अथवा । अम्बा माता यथा भणति ब्रवीति, तथैव भवतु इति तात्पर्य्यम् । निवृत्तिरेवात कारणत्वात् नमस्तु स्वयमहमार्य्यपुत्रं निन्दामीति भावः ।

(ङ) राम इति । ईदृशः सीताया आर्य्यपुत्रपदायोग्यः । नितान्तदुर्भंसकार्य्यानुष्ठानादिति भावः ।

भागी । प्रसीद (१) भगवति ! वसुन्धरे ! शरीरमसि संसारस्य; तत् किमसंविदानेव जामात्रे कुप्यसि । [च]

घोरं लोके विततमयशो, या च वह्नौ विशुद्धि-

र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु ।

भागीवि । प्रसीद रामं प्रतीति शेषः । संसारस्य जगतः शरीरं देहरूपा, स्वकीयत्वात्तं स्वकीया तनुरिव सर्वेषां सकलप्राणिनां त्वमवगन्तव्यसीत्यर्थः । तत्तस्मात् किं कथम् असंविदानेव अजानतीव जामात्रे रामाय कुप्यसि । न तदुचितमिति भावः ।

असंविदानेति अकर्म्मकत्वात् "समोगम्यृच्छी"त्यादिना आत्मनेपदम् । जामात्र इति "यं प्रति च कोप" इति सम्प्रदानत्वाच्चतुर्थी ।

पृथिव्याः सर्ववृत्तान्ताभिज्ञत्वमुक्तम्—

'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।

अहश्च रात्रिश्च उभे च सन्ध्ये धर्म्मश्च जानाति नरस्य वृत्तम् ॥"

ननु रामेणापि कथमिदमतीवायुक्तमनुष्ठितमित्याह घोरमिति । लोके भुवने घोरं दुःसहत्वात् दारुणम् अयशो यशोविरोधिनी निन्देत्यर्थः विततं विस्तीर्णम् । अथ अग्निपरीक्षया प्रतीतायामपि चरित्रशुद्धौ कथं निन्देत्याह लङ्केत्यादि । लङ्काद्वीपे सर्वतः समुद्रवेष्टितायां लङ्कायां वह्नौ या च विशुद्धिः निर्दोषत्वपरीक्षा आसीदिति शेषः, इह भारतवर्षे जनो लोकः कथमिव तां विशुद्धिं श्रद्दधातु विश्वसितु । प्रत्यक्षगोचरत्वाभावात् लोकाः सन्दिग्धे, दूरवर्त्तिनि तु कथमपि न विश्वसिन्त्येवेति भावः । ननु अलीकालीकनिन्दया किमायाति याति वा, ततः कथमीदृशमनुष्ठितमित्याह इत्याकर्णामिति । • यत् कृतस्नो लोकः सर्वाः प्रजाः समाराधनीयः अनुकूलव्यवहारादिना सम्यक् तोषणीयः, तत् प्रजानां विरागापसारणेन सन्तोषोत्पादनम् अतिगहनं नितान्तदुष्करं कार्य्यं एकस्य व्यवहारेण सर्वेषां सन्तोषोत्पत्तेः प्रायेणासम्भवात् इति भावः ।

---

(१) प्रसीदेति पाठः क्वापि नास्ति ।

इक्ष्वाकूणां कुलधनमिदं यत् समाराधनीयः
कृत्स्नो लोकस्तदतिगहनं [१] किं स वत्सः करोतु॥६॥

लक्ष्म । अव्याहतान्तःप्रकाशा हि देवता भूतेषु विशेषेण गङ्गा, तदेष ते प्रणामाञ्जलिः । [२] [क]

रामः । अम्ब ! अनुवृत्तस्त्वया भगीरथगृहे प्रसादः । [ज]

इदम् इक्ष्वाकूणां इक्ष्वाकुवंशोद्भवानां जनानां सन्तोषोत्पादनरूपं दुष्करं कर्म्म कुलधनं धनमिव सर्वथा रक्षणीयमिति कौलिकं व्रतमित्यर्थः । ननु तथात्वेऽपि सीतापरित्यागस्य किं प्रयोजनमित्याह किमिति स वत्सः स्नेहपात्रीभूतो रामः किं करोतु सीतापरित्याग विना किं कार्य्यं कुर्य्यात् । यामाश्रित्य समुत्पन्नया निन्दया जनानां विरागो जातः तदपसारणेनैव निन्दापगमात् विरागापगमेन सन्तोषः स्यादित्यभिप्रेत्यैव सीता निर्वासितेति भावः ।

अत्र सीतानिर्वासनकार्य्यस्य एकस्मिन् लोकनिन्दारूपे कारणे सत्यपि लोकसन्तोषकरणीयतारूपकारणान्तरोपन्यासात् समुच्चयोऽलङ्कारः ।

मन्दाक्रान्ता वृत्तम् ॥७॥

(क) लक्ष्मेति । हि यस्मात् देवताः देवजातयः भूतेषु प्राणिषु विषयेषु अव्याहतः केनचिदपि अनिवारितः, अन्तःप्रकाशः अन्तःकरणवृत्तेः प्रसारः अन्तर्य्यामित्वमिति यावत् यासां ताः, देवा हि अन्तर्य्यामितया सर्वेषामेव प्राणिनां सर्वं वृत्तान्तजातं जानन्तीत्यर्थः । विशेषेण आधिक्येन, गङ्गा अव्याहतान्तःप्रकाशेत्यर्थः सर्वदेवताभ्यः प्रकृष्टत्वेन गङ्गायास्तत्त्वादिति भावः । तस्मात् अस्मदादिभ्यो मानुषेभ्यो देवानां प्राधान्यादित्यर्थः ते तुभ्यम् एष मया क्रियमाणः, प्रणामाय नमस्काराय अञ्जलिः हस्तयोः संयोगः । भक्त्यातिशयात् त्वां प्रणमामीत्यर्थः ।

(ज) राम इति । अम्ब ! मातः ! त्वया भगीरथगृहे भगीरथवंशे प्रतीत्यर्थः प्रसादः अनुग्रहः, अनुवृत्तः अधिकृतः, भगीरथात् प्रभृति मां यावत् अविच्छिन्नभावेन कृत इत्यर्थः । अन्यथा अस्माकं परोक्षे मां प्रति रोषकलुषितां पृथिवीं कथं प्रसादयेरिति भावः ।

---

(१) तदतिविषममिति पाठान्तरम् । (२) तदेष ते प्रणामाञ्जलिरिति पाठभेदः ।

पृथ्वी। देवि! नित्यं प्रसन्नास्मि वः, किन्त्वापातदुःसहः शोकावेगोऽपत्यस्य; तेनैवं [१] ब्रवीमि, न पुनर्न जानामि सीतास्नेहं रामभद्रस्य। [झ]

दह्यमानेन मनसा दैवाद्वत्सां विहाय सः।
लोकोत्तरेण सत्त्वेन [२] प्रजापुण्यैश्च जीवति ॥७॥

रामः। सकरुणा हि गुरवो गर्भरूपेषु। [ञ]

(झ) पृथ्वीति। वो युष्माकं सम्बन्धिं युष्मत्पक्षीयान् रामादीन् प्रतीत्यर्थः। तर्हि कथं 'कः कस्यार्यपुत्र' इत्थं ब्रवीषीत्याह किन्त्विति। अपत्यस्य सन्तानस्य शोकावेगः आपातदुःसहः, परन्तु कार्यकारणादिविवेचनेन स्वयमेव सान्त्वनोदयात् सहनीयः स्यादिति भावः। पुनः किन्तु रामभद्रस्य सीतास्नेहं सीतां प्रति प्रणयं न जानामि इति न, अपि तु जानाम्येवेत्यर्थः।

कीदृशं जानासीत्याह दह्यमानेनेति। दैवात् नियतिवशात् वत्सां सीतां विहाय निर्वास्य दह्यमानेन तदीयवियोगदुःखैः सन्तप्यमानेन मनसा उपलक्षितः सः रामः लोकोत्तरेण सर्वलोकश्रेष्ठेन सत्त्वेन व्यवसायेन धैर्येणेति यावत् प्रजापुण्यैः सर्वजनसम्पन्ननरपतिलाभहेतुभूतैः प्राक्तनैः प्रजानां धर्मैश्च जीवति प्राणान् धारयति। अन्यथा दारुणसीताशोकेन तस्य प्राणधारणमसम्भवमेव स्यादित्येव जानामीति भावः। अत्र कारणभूतानि पुण्यानि प्रजासु, तत्कार्यभूतं जीवनञ्च रामे, इत्थं कार्यकारणयोर्भिन्नदेशस्थितत्वात् असङ्गतिरलङ्कारः ॥७॥

(ञ) रामेति। गुरवः श्वश्रूश्वशुरादयो गुरुजनाः गर्भरूपेषु सन्तानभूतेषु जामात्रादिषु सकरुणा हि अपराधे सत्यपि सदया एव। अन्यथा आत्मजायाः सीतायाः निर्वासनेन पृथ्वी देवी शापादिना मम किञ्चिदपि अनर्थमकार्षीत् इति भावः।

---

(१) किन्त्वापातदुःसहस्त्वावेगेनैवमिति क्वापि पाठः।

(२) धैर्येणेति पाठभेदः।

सीता। रुदती कृताञ्जलिः। णेदु मं अत्तणो अङ्गेसु विलअं अम्बा। [ट]

रामः। किमन्यद् ब्रवीतु। [ठ]

भागी। शान्तम्, अविलोमा वत्सरसहस्राणि भूयाः। [ड]

पृथ्वी। वत्से! अवेक्षणीयौ [१] ते पुत्रकौ। [ढ]

सीता। अणाधाह्मि। [२] [ण]

रामः। हृदय! वज्रमयमसि। [त]

(ट) नयतु मामात्मनोऽङ्गेषु विलयमम्बा।

(ण) अनाथास्मि।

(ट) सीतेति। आत्मनोऽङ्गेषु स्वमयस्वकीयदेहावयवेषु विलयं नयतु लोप [illegible] प्रापयतु।

(ठ) राम इति। अन्यत् उक्तवचनं विना। अभीरविशादे निक्षारोपायाभावे सर्वं [illegible] मरणं च्छाया एव बलवत्त्वात् युक्तमेवोक्तमिति भावः।

(ड) [illegible]गीति। शान्तमिति वारणार्थमव्ययमिति शब्दकल्पद्रुमः। [illegible] प्रकारं न वाच्यमित्यर्थः। बहूनि वत्सराणां सहस्राणि व्याप्य अविलीना अविलुप्ता जीवितेत्यर्थः।

(ढ) पृथ्वीति। अवेक्षणीयौ स्तन्यदानतत्त्वावधानादिना पर्य्यवेक्षणेन रक्षणीया[illegible] वित्यर्थः। अनयोर्जीवनार्थमेव तव जीवनमावश्यकमिति भावः।

(ण) सीतेति। अनाथा अशरणा। रक्षकहीनया मया कथं पुत्रौ रक्षितुं शक्येते इति भावः।

(त) राम इति। वज्रमयं वज्रवत् कठिनमित्यर्थः। येन सार्वभौमस्य ममैवं [illegible] रक्षकहीनतावचनश्रवणेनापि त्वं न विदीर्णमिति भावः।

---

(१) अपि रक्षणीयौ इति पाठान्तरम्।

(२) किं एदेहिं इति क्वापि अधिकः पाठः।

भागी। कथं त्वं सनाथाप्यनाथा। (थ)

सीता। कीदिसं मम अभव्वाए सणाधत्तणं। (१) (द)

देव्यौ। जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे।

आवयोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते ॥८॥

लक्ष्म। आर्य्य! श्रूयताम्। (२) (ध)

(द) कीदृशं ममाभव्यायाः सनाथत्वम्।

(थ) भागीति। नाथेन पत्या सह वर्त्तमाना जीवत्पतिकेत्यर्थः; तथापि कथम् अनाथा रक्षकहीना। पतिस्ते जीवति, स एव च त्वां रक्षिष्यतीति भावः।

(द) सीतेति। अभव्यायाः अशुभास्पदीभूतायाः, भीषणकलङ्केन तस्मान्निर्वासितेन च दुर्गतेः परां काष्ठां प्राप्ताया इत्यर्थः। सनाथत्वं रक्षकसहितत्वम्। रक्षकोऽपि पत्या बाढं परित्यक्ता, सुतरां कुतो मे रक्षक इति भावः।

जगदिति। हे सीते! त्वं जगन्मङ्गलं जगतां कल्याणकारणीभूतम् आत्मानं स्वां कथं केन हेतुना अवमन्यसे अमङ्गलास्पदत्वेन अपवित्रत्वात् अनाथासि अभव्याया मम इत्यादिना परिभवसि निन्दसीत्यर्थः। यस्यास्तव सङ्गात् संसर्गात् आवयोरपि अन्यत्र का कथा पावनत्वेन प्रसिद्धयोः पृथिवीगङ्गयोरपि पवित्रत्वं पावनत्वं प्रकृष्यते उत्कर्षं प्राप्नोति। सुतरां पातिव्रत्येन जगति त्वं सर्वप्रधानपवित्रासीति नात्माऽवमाननीय इति भावः।

अत्र पृथिवीगङ्गयोः पवित्रत्वप्रकर्षासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः।

पतिव्रतायाः पवित्रत्वमुक्तं ब्रह्मवैवर्त्ते—

पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि।

तेजश्च सर्वदेवानां मुनीनाञ्च सतीषु च ॥८॥

(ध) लक्ष्मेति। श्रूयतां पृथिवीगङ्गयोर्वाक्यमिति शेषः। अनेन वाक्येन आर्य्या सीतादेवी कीदृशी पतिव्रता पवित्रा चेत्यवधार्य्यतामिति भावः।

---

(१) मन्दभागिन्या इति पाठभेदः। (२) श्रुतमिति पाठान्तरम्।

रामः । शृण्वन्तु लोकाः । [न]

नेपथ्ये कलकलः ।

रामः । अद्भुततरं किमपि ! [प]

सीता । किं ति अन्तरिक्खं [१] पज्जलदि । (फ)

देव्यौ । ज्ञातम् । [ब]

कृशाश्वः कौशिको राम इति येषां गुरुक्रमः ।

आविर्भवन्ति तान्येव शस्त्राणि सह जृम्भकैः ॥८॥

नेपथ्ये । देवि ! सीते ! नमस्तेऽस्तु गतिर्नः पुत्रकौ हि ते ।

(फ) किमिति अन्तरिक्षं प्रज्वलति ।

(न) राम इति । लोकः सर्वे जनाः । कृतावितथवचनम् । मया तु परिजन-कथनात् प्रश्नत्येव सीतायाः पातिव्रात्यं पावनत्वञ्च सम्यगवधारितं विश्वस्तञ्च, इदानीं पृथिवीगङ्गयोर्वाक्येन किमधिकमवधार्यते, ये पुनरुद्धावासेन सीतायाश्चरित्रं सन्दिहाना नानाविधमपवादमकल्पयन् त एव लोकाः पृथिवीगङ्गयोर्वचनमिदं शृण्वन्तु श्रुत्वा च सीताचरित्रनैर्मल्यमवधारयन्त्विति भावः ।

(प) राम इति । अद्भुततरम् इतोऽपि आश्चर्यतरं, किमपि घटनादर्शनं भवेदिति भावः ।

(फ) सीतेति । अन्तरिक्षम् आकाशं प्रज्वलति प्रदीप्यते ।

(ब) देव्याविति । ज्ञातम् आकाशप्रदीप्तेः कारणमिति शेषः ।

कृशाश्व इति । कृशाश्वो मुनिः कौशिको विश्वामित्रः, राम इति इत्थं येषां शस्त्राणां गुरुक्रमः उपदेष्टृपरम्परा, कृशाश्वात् विश्वामित्रः तस्माच्च रामो यानि शस्त्राणि

---

(१) सबलं अन्तरिक्खमिति क्वापि पाठः ।

आलेख्यदर्शने देवी यदाह [१] रघुनन्दनः ॥१०॥

सीता। दिट्ठिआ अत्थदेअदाओ परिप्फुरन्ति। [भ]

लक्ष्म। उक्तमासीदार्य्येण सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्तीति। [म]

राम:। (२)। नमो वः परमास्त्रेभ्यो धन्याः स्मो वः परिग्रहात्।
अनुध्यातैः रूपेतव्यं वत्सयोर्भद्रमस्तु वः ॥११॥

(भ) दिष्ट्या अस्त्रदेवताः परिस्फुरन्ति।

लब्धवानित्यर्थः, तानि च अस्त्राणि जृम्भकैः रस्त्रैः सह आविर्भवन्ति प्रकाशन्ते। तेनान्तरिक्षं प्रज्वलितमिति भावः ॥९॥

देवीति। हे सीते देवि! ते तुभ्यं नमः अस्माकं प्रणामोऽस्तु। हि यस्मात् ते तव पुत्रकौ नवजातौ सुतौ नोऽस्माकं गतिराश्रयः, प्रभुमातृत्वादिव त्वां प्रणमाम इति भावः। मम पुत्रौ कथं युष्माकमाश्रयीभूताविल्याह। देवो रघुनन्दनो रामः आलेख्यदर्शने चित्रदर्शनवेलायां यत् आह ब्रवीति वदति स्मेत्यर्थः। तस्मादेव वयं तव पुत्रौ आश्रयाम इति भावः।

अत्र वर्त्तमानकाले निपातनसिद्धस्य आहेत्यस्य अतीते प्रयोगात् च्युतसंस्कारता दोषः, यदाह स्म रघूद्वहः इति पाठे तु तद्दोषाभावः।

भवन्तः दरणाश्रय— इत्यादिवदुभयोर्मिलितयोरेव समानाश्रयत्वप्रतिपादनार्थं गतिरित्येकवचनम् ॥१०॥

(भ) सीतेति। दिष्ट्या पुत्रयोर्मम च सौभाग्येन अस्त्रदेवताः जृम्भकास्त्राणामधिष्ठात्र्यो देवताः परिस्फुरन्ति प्रकाशन्ते।

(म) लक्ष्मेति। आर्य्येण पूर्व्वेण भवता, इति इत्यन्तं, उक्तं चित्रदर्शनवेलायामित्यर्थः।

नम इति। परमास्त्रेभ्यः उत्कृष्टजृम्भकास्त्रदेवताभ्यः वो युष्मभ्यं नमः कायमयं नमस्कारं इत्याह, वयं वो युष्माकं परिग्रहात् लाभात् धन्याः कृतार्थाः अनन्या-

---

(१) यथाहेति पाठान्तरम्। (२) दिव्याविति क्वापि पाठः।

"क्षुभिताः कामपि दशां कुर्वन्ति मम साम्प्रतम्।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः ॥१२॥

देवी। मोदस्व वत्से!, मोदस्व,[१] रामभद्रतुल्याविदानीं ते पुत्रकौ संवृत्तौ। (य)

सीता। भअवदीओ! को एदाणं क्खत्तिओचिदं कम्म करिस्सदित्ति। [र]

रामः। एषा [२] वशिष्ठगुरुमाता रघूणां वंशवर्द्धिनी।

(व) भगवत्यौ? क एतयोः क्षत्रियोचितं कर्म करिष्यतीति।

अशेषत्वेन प्रथिता इत्यर्थः वा जाताः। अनुध्यातैः मत्पुत्राभ्यां गङ्गे: सद्भिर्वा... धनयोर्मम पुत्रयोरपेतव्यं सन्निधातव्यम्। वो युष्माकं भद्रं मङ्गलम् अस्तु ॥११॥

क्षुभिता इति। साम्प्रतम् अधुना विस्मयानन्दयोः सन्दर्भेण आश्चर्यहर्षयो... ग्रथनेन संयोगेनेत्यर्थः जर्जराः व्याप्ताः कृताः क्षुभिता उद्वेलिताः करुणोर्मयः शोकतरङ्गा मम कामपि अनिर्वचनीयां दशाम् अवस्थां कुर्वन्ति। पृथिवीगङ्गयो- ... लौकिकवृत्तान्तविलोकनात् विस्मयेन, पुत्रजन्मनिबन्धनेन हर्षेण, प्रिय- तमावियोगजन्मना रङ्गदर्शनात् नवीभावमापन्नेन शोकेन च अहमिदानीमात्मनि विमूढो- ऽस्मीति सरलार्थः।

अत्र अद्भुतो रसः हर्षाख्यभावश्च करुणरसस्याङ्गमिति रसवदलङ्कारः। ऊर्मि- शब्देन करुणस्य सागरतुल्यमगाधत्वं व्यज्यते ॥१२॥

(य) देव्याविति। मोदस्व आनन्दिता भव, हर्षे द्विरुक्तिः। हर्षकारणमाह रामभद्रतुल्याविति। जृम्भकास्त्रलाभात् रामभद्रसमानसामर्थ्यावित्यर्थः।

(र) सीतेति। क्षत्रियोचितं क्षत्रियवर्णयोग्यं, कर्म जातकर्मादिसंस्कारं।

एषेति। वशिष्ठेन ब्रह्मर्षिणा गुरुमाता संस्कारकर्मणा बीजगर्भसमुद्भवपापेभ्यः शान्तिविधानेन दैवोपद्रवेभ्यश्च रक्षितानां रघूणां रघुवंश्यानां वंशवर्द्धिनी पुत्रप्रसवेन कुलवृद्धिकारिणी एषा सीताऽपि सुतयोः पुत्रयोः संस्कर्त्तारं जातकर्मादिसंस्काराणां

(१) रमस्व वत्से! नन्दस्व वत्से! इति पाठभेदौ। (२) एषामिति क्वापि पाठः।

कष्टं सीतापि सुतयोः संस्कर्त्तारं न विन्दति ॥१३॥

देव्यौ । (१) पुत्रि ! किं तवानया चिन्तया एतौ हि वत्सौ स्तन्यत्यागात् परेण भगवतो वाल्मीकेरर्पयिष्याव: [२] स एवं तयोः क्षत्रकृत्यं करिष्यति । [ल]

यथा वशिष्ठाङ्गिरसावृषी प्राचेतसस्तथा ।
रघूणां जनकानाञ्च वंशयोरुभयोर्गुरुः ॥१४॥

राम: । सुविचिन्तितं भगवतीभ्याम् । [३] (व)

सम्पादयितारं जनं न विन्दति न प्राप्नोति, एतदेव कष्टम् । रघुवंशीयानां सकलदैवकर्मसम्पादयितरि सति वशिष्ठे सीतासुतयोः संस्कर्त्तुरभाव इति दारुणं दृशापरिहत्तिरिति भावः ।

अत्र कष्टमिति वाक्यस्य पवित्यादिवाक्यान्तर्गतत्वेऽपि न गर्भितत्वदोषः साहश्यसमावेशेन विषादातिशयद्योतनात् गर्भितस्य गुणः क्वापीति साहित्यदर्पणोक्तेः ॥१३॥

(ल) देव्याविति । हि यस्मात् । स्तनं भवं स्तन्यं दुग्धं तस्य त्यागात् स्तनपानत्यागादिति तात्पर्यं । वाल्मीकेः समीपे । क्षत्रकृत्यं क्षत्रियोचितं जातकर्म्मादिसंस्कारं कर्त्तव्यं ।

ननु वशिष्ठसदृशः कोऽपि गुरुत्वं कृतः महाप्रभावो वशिष्ठ एव संस्कारं कुर्य्यात् भद्रं व पुत्रं भवेदित्याह यथेति । वशिष्ठ: ब्रह्मपुत्रः आङ्गिरसः प्रतानन्द इति वशिष्ठाङ्गिरसी ऋषी यथा, यथाक्रमेण रघूणां जनकानाञ्च गुरु, तथा प्राचेतसो वाल्मीकिरपि तयोरुभयोर्वंशयोः गुरुः मन्त्रोपदेष्टा । सुतरां वाल्मीकेरौदासीन्यं वशिष्ठादपकृष्टत्वञ्च न शङ्कनीयमिति भावः ॥१४॥

(व) राम इति । भगवतीभ्यां पृथिवीगङ्गाभ्यां सुविचिन्तितं सम्यक् विवेचनं कृतम् ।

---

(१) भागीति क्वचित् पाठोऽदृश्यते । (२) अर्पयिष्यामीति पाठान्तरम् ।

(३) भगवतीति पाठान्तरम् ।

लव। आर्य्य ! सत्यं विज्ञापयामि, तैस्तैरुपायैर्वं तुमो कुशलवावुत्प्रेक्षे। [अ]

एतौ हि जन्मसिद्धास्त्रावुभौ प्राचेतसान्मुनेः। [१]
वीरौ सम्प्राप्तसंस्कारौ वयसा द्वादशाब्दिकौ ॥१५॥

रामः। वत्स ! इतीव वाहं परिप्लवमानहृदयः प्रमुग्धोऽस्मि। (२)(ब)

पृथिवी। एहि वत्से ! पवित्रीकुरु रसातलम्। [स]

रामः। हा प्रिये ! लोकान्तरं गतासि। [ह]

(अ) लव इति। तैस्तैरुपायैर्हेतुभिः। उत्प्रेक्षे सीतापुत्रत्वेनानुमिनोमि। तत्रानुमानहेतुनाह एताविति। हि यस्मात्। एतौ उभौ कुशलवौ जन्मनः उत्पत्तेः प्रभृति सिद्धानि उपस्थितानि अस्त्राणि जृम्भकास्त्राणि ययोस्तौ, सीतासुतयोरपि अल्पकाल एव जृम्भकास्त्रलाभ इदानीमिवागवत इति भावः। प्राचेतसात् वाल्मीकिमुनेः सकाशात् सम्प्राप्ताः संस्कारा जातकर्म्माद्युपनयनान्ता याभ्यां तौ, सीतापुत्रयोरपि तत्परित्यागात् परं संस्कारकर्म्मार्थं वाल्मीकिसमीपे समर्पणं श्रुतमिति भावः ॥१५॥

(ब) राम इति। इतीव अस्माद्धेतोरिव सीतापुत्रत्वेनानुमानादित्यर्थः: परिप्लवमानहृदयः आनन्देन चञ्चलचित्तः सन् प्रमुग्धः, जडः।

(स) पृथ्वीति। रसातलं पातालं पवित्रीकुरु अनयोः सन्त्यागं यावदत्र स्थानेन पुनीहि।

(ह) राम इति। लोकान्तरं मर्त्यलोकभिन्नं लोकं पातालमित्यर्थः।

(१) जातौ प्राचेतसादिति; प्राप्तप्राचेतसादुभौ। आर्य्यतुल्याकृती वीरौ इति च पाठान्तरम्। (२) इति परिप्लवमानहृदयः सन् मुग्धोऽस्मीति क्वापि पाठः।

सीता। णिदु मं अत्तणो अङ्गेसु विलअं अम्बा, ण सक्कह्मि ईदिसं जीअलोअपरिवत्तं अणुभविदुं। [च]

रामः। किमुत्तरं स्यात्। [क]

पृथिवी। वत्से! स्तन्यत्यागं यावत्सन्नियोगतः पुत्रकयोरपेक्षस्व, परेण ते यथा रोचिष्यते [१] [ख]

भागी। [२] एवं नाम [ग]

ततो निष्क्रान्ता गङ्गापृथ्वीसीताः।

रामः। कथं विलय एव वैदेह्याः सम्पन्नः। हा देवि! दण्डकारण्यवासप्रियसखि! हा चारित्रदेवते! लोकान्तरं पर्य्यवसितासि। इति मुह्यति। [घ]

(च) नयतु मामात्मनोऽङ्गेषु विलयमम्बा, न शक्नोमि ईदृशं जीवलोकपरिवर्त्तमनुभवितुं।

जनन्यादिभिरस्य अवश्यपालनीयत्वं न सीतायाः पातालगमनाभावः, अतस्तां प्रति निर्देशः। हा इति विषादोक्तिरिति बोध्यम्।

(च) सीतेति जीवलोकपरिवर्त्तम् अवस्थापरिवर्त्तनमित्यर्थः। रसातलं गत्वापि जीवन्त्या मया ईदृशमेव दुःखमनुभवितव्यम्, अतस्तव गमनान्मरणमेव मे श्रेय इति भावः।

(क) राम इति। किमुत्तरम् अस्याः सीतोक्तेः पृथिव्याः किं प्रतिवचनं स्यादित्यर्थः, पृथिवी अस्याः किमुत्तरं ददातीति श्रोतुं समाकुलोऽस्मीति भावः।

(ख) पृथ्वीति। पुत्रकयोः स्तन्यत्यागं यावत् स्तन्यपानपरित्यागपर्य्यन्तं सन्नियोगतः ममादेशात् अपेक्षस्व विलम्बस्व। परेण स्तन्यत्यागात् परेण कालेन ते तुभ्यं यथा रोचिष्यते तथा करिष्यसीति शेषः। परेणेति तृतीयाऽपवर्गे।

(ग) भागीति। एवं नाम भवत्विति शेषः। स्तन्यत्यागं यावदपेक्षस्वेत्यर्थः।

(घ) राम इति। विलयमिति शोकसम्भ्रमे। वैदेह्याः सीताया विलयः

---

(१) यथा रोचते तथा करिष्यसीति पाठभेदः। (२) गङ्गेति पाठान्तरम्।

लक्ष्म। भगवन्! वाल्मीके! परित्रायस्व एष एव ते किं काव्यार्थः [ङ]

नेपथ्ये। अपनीयतामातोद्यकं, भो भोः सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः! पश्यत, महर्षिणा भगवता वाल्मीकिना अनुज्ञातं पवित्रमाश्चर्य्यम्। (च)

लक्ष्म। विलोक्य। मन्थादिव क्षुभ्यति गाङ्गमम्भो-

व्याप्तञ्च देवर्षिभिरन्तरीक्षम्।

अन्तर्धानं लोकान्तरे गमनमित्यर्थः। चरितमेव चारित्रं तेन पातिताः प्राचरितैः इव, इव तत्कर्त्तव्यबोधनम्। लोकान्तरं प्रातालं पर्य्यवसितासि गतासि। अनेन स्य- र्शात् कर्त्तरि क्तः।

(ङ) लक्ष्मेति। परित्रायस्व रामस्य जीवनसम्पादनेन रक्षां कुरु। एष सीताहरणेन रामस्य जीवनविनाशः किं ते तव काव्यस्य दृश्यकाव्यस्य नाटकाभिनय- रूपस्य अर्थः प्रयोजनम्। अभिनयेन रामस्य विनाश एव किं तवाभीष्टमासीदिति सरलार्थः। नैतदुचितमिति भावः।

(च) नेपथ्य इति। आतोद्यकं वीणादिचतुर्विधवाद्यं (कनसाट) अपनी- यताम् अपसार्य्य तां ऐकतानवादनं परित्यज्यतामित्यर्थः। अन्यथा ताण्डवनाटकादिमधुर- निनादश्रवणेन लोकानां हृदयाकर्षणेन तत्पतत्स्वमाताश्चर्य्यदर्शने व्याघातः स्यादिति भावः। जङ्गमाः गमनशीलाः पश्वादयः स्थावराः स्थितिशीलाः पर्वताधिष्ठातृदेवतादयः तैः सह वर्त्तमाना इति सजङ्गमस्थावराः। प्राणभृतः प्राणिनः, मर्त्याः मरणशीलाः मनुष्यास्च अमर्त्याः अमराः देवाः। पवित्रम् आश्चर्य्यञ्च किञ्चित् अनुज्ञातम् आदिष्टम्, तत् पश्यतेत्यन्वयः।

नेपथ्यात् सूत्रधारस्योक्तिरियम्। एष च सन्दर्भः निष्कम्भसमता चूलिका नाम गर्भाङ्कस्यार्थोपक्षेपकविशेषः। तथा च साहित्यदर्पणः—

---

(१) क्वचित् किं शब्दो नास्ति।

आश्चर्य्यमार्य्या सह देवताभ्यां
गङ्गामहीभ्यां सलिलादुदेति ॥१६॥

पुनर्नेपथ्ये । अरुन्धति ! जगद्वन्द्ये ! गङ्गापृथ्व्यौ भजस्व (१) नौ
अर्पितेयं तवाभ्यासे सीता पुण्यव्रता वधूः ॥१७॥

लव । दिष्ट्या (२) आश्चर्य्यमाश्चर्य्यम् । आर्य्य ! पश्य पश्य,
कष्टमद्यापि नोच्छ्वसित्यार्य्यः । (छ)

अन्तर्यवनिकासंस्थैः सूचनाऽर्थस्य चूलिका ।

वाल्मीकिना अनुज्ञातं तत् पवित्रमाश्चर्य्यं च समुत्पद्यमानं लक्ष्मणो विलोक्य प्रकाटयति मन्थादिवेति । गङ्गाया इदमिति गाङ्गम् अम्भः जलम् मन्थादिव मन्थानदण्डेन आलोडनादिव क्षुभ्यति उच्छलति, देवाश्च ऋषयश्च तैः देवर्षिभिः अन्तरिक्षम् आकाशं व्याप्तम् आकीर्णम् । आश्चर्य्यदर्शनाय देवा ऋषयश्च गगणे समागता इत्यर्थः । अहो आश्चर्य्यम्, आर्य्या सीता गङ्गामहीभ्यां भागीरथीपृथिवीभ्यां देवताभ्यां सह सलिलात् गङ्गाजलात् उदेति उत्तिष्ठति । महदिदमद्भुतमिति भावः ।

अत्र भावाभिमानिनी वाच्या क्रियोत्प्रेक्षाऽलङ्कारः । क्षुभ्यति उदेतीति कर्त्तृप्रत्ययान्तमुख्यक्रिययोर्मध्ये व्याप्तमिति कर्म्मप्रत्ययान्तगौणक्रियासन्निवेशात् भग्नप्रक्रमता दोषः स च देवर्षिसङ्घश्च नभः समेतीति पाठेन समाधेयः । इन्द्रवज्रा वृत्तम् ॥१६॥

अरुन्धतीति । हे जगद्वन्द्ये पतिव्रताशिरोमणित्वेन जगतां पूजनीये अरुन्धति ! नौ आवां गङ्गापृथ्व्यौ भागीरथीपृथिव्यौ भजस्व सेवस्व आवयोर्वचनानुसारेण क्रियानिष्पादनात् सन्तोषयेत्यर्थः । इयं पुण्यं पवित्रम् व्रतं शास्त्रविहितो नियम आचार इति यावत् यस्याः सा पुण्यव्रता वधूः स्नुषा सीता तव अभ्यासे समीपे अर्पिता न्यस्ता यथायदस्या रक्षणाविक्षणाभ्यामावयोः सन्तोषः स्यादिति भावः ॥१७॥

---

(१) नुषस्वेति क्वापिपाठः । (२) अहो इति पाठान्तरम् ।

ततः प्रविशत्यरुन्धती सीता च ।

अरु । त्वरस्व वत्से वैदेहि ! मुञ्च शालीनशीलताम् ।
एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना ॥१८॥

सीता । ससम्भ्रमं समुपसृत्य रामं स्पृशन्ती । (१) समस्ससिदु अज्जउत्तो (ज)

रामः । समाश्वस्य सानन्दम् । भोः ! किमेतत् । दृष्ट्वा सहर्षाद्भुतम् । कथं देवी । सलज्जस्मितं । अये ! अम्बा अरुन्धती, सर्वे च प्रहृष्यन्त ऋष्यशृङ्गशान्तासमिता गुरवः (झ)

अरु । वत्स ! एषा भगवती भगीरथगृहदेवता सुप्रसन्ना गङ्गा । (ञ)

नेपथ्ये । जगत्पते रामभद्र ! स्मर्यतामालेख्यदर्शने मां प्रत्यात्मनो वचनम् । यथा, सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भव, तत्रानृणास्मि जाता । (ट)

(ज) समाश्वसितु आर्यपुत्रः ।

त्यजेति । पश्य पश्य तुच्छा दर्शनाय रामस्य चेष्टाकपश्यन् वदनं परावर्ती कृच्छितं रामवलोकयत्राह कष्टमित्यादि । उच्छ्वसिति संज्ञां लभते ।

त्वरस्वेति । हे वत्से वैदेहि ! त्वरस्व सत्वरा भव, शालीनशीलतां लज्जाशीलत्वं मुञ्च परित्यज, आसन्नविपदि लज्जाया अयाय्यत्वादिति भावः । एहि आगच्छ प्रियस्पर्शेन पाणिना स्वकीयकरेण मे मम वत्सं स्नेहभाजनं रामं जीवय संज्ञापय ॥

स्यादधृष्टे तु शालीन इत्यमरः ॥१८॥

(झ) राम इति । कथं शब्दो हर्षे देवी सीता उपस्थितेति शेषः । प्रहृष्यन्त आनन्दन्तः । गुरवः मातरः कौशल्यादयः उपस्थिता इति शेषः ।

(ञ) अरु इति । एषा अदूरे दृश्यमाना, भगीरथगृहदेवता भगीरथकुलोपास्या इति तात्पर्य्यम् सुप्रसन्ना दुष्मान् प्रत्यनुग्रहकारिणी ।

(ट) नेपथ्य इति । जगत्पते ! पृथिवीपते ! नारायणावतारत्वेन त्रिभुवनेश्वर

(१) समुत्भ्रमम् स्पृशन्तीत्यतावन्मात्रः क्वचित् पाठः ।

अरु। इयन्ते श्वश्रूर्भगवती वसुन्धरा। (ठ)

नेपथ्ये। उक्तञ्च पूर्वमायुष्मता वत्सात्यागे (१) यथा, भगवति वसुन्धरे! श्लाघ्यां दुहितरमवेक्षस्व जानकीमिति, तदधुना कृतवचनास्मि प्रभोर्वत्सस्येति। (ड)

रामः। कथं कृतमहापराधो भगवतीभ्यामनुकम्पितः, प्रणमामि वः। (ढ)

अरु। भो भोः पौरजानपदाः! भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्यमाना ममारुन्धत्याः समर्पिता, पूर्वञ्च

इति च ध्वन्यते। आलेख्यदर्शने चित्रदर्शनवेलायाम्। आत्मनः स्वस्य अनायासेन रामस्य करणाय तद्वचनमुद्धरति सा त्वमिति। अनृणा ऋणमुक्ता जगदीश्वरादेशाति-क्रमस्य अन्याय्यत्वात् ससन्तानसीतापर्यवेक्षणेन प्रतिपालिततदादेशा इत्यर्थः। गङ्गाया उक्तिरियम्।

(ठ) अरु इति। श्वशुरस्य स्त्रीति श्वश्रूः।

(ड) नेपथ्य इति। आयुष्मता दीर्घायुषा त्वया, वत्सायाः सीतायाः त्यागे परित्यागकाले। किमुक्तमित्याह भगवतीत्यादि। भूपतित्वात् प्रभोरधिपतेः, जामातृत्वात् वत्सस्य स्नेहास्पदस्य तव कृतवचना भूपतित्वं अनुष्ठितनिदेशा, जामातृत्वे पूरितप्रार्थनेत्यर्थः। पृथिव्या उक्तिरियम्।

(ढ) राम इति। कथमिति सम्भावनायाम्। कृतः सीतानिर्वासनात्मको महापराधो येन स तथोक्तः। अनुगृहीतः। अहो गरीयसी निष्कारणा करुणेति भावः। वो युष्मान् गौरवात् बहुवचनम्। विसर्जनसूचनाय प्रणाम इति बोध्यम्।

(ण) अरु इति। जाह्नवीवसुन्धराभ्यां गङ्गापृथिवीभ्याम् एवम् आवयोरपि यत् सेऽत्र पवित्रत्वं प्रकाश्यते इत्येवंरूपेण प्रशस्यमाना महापवित्रत्वं न सतीशिरोमणि-

---

(१) वत्सापरित्यागे इति क्वापि पाठः।

भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा, सब्रह्मकैश्च देवैः संस्तुता सावित्रकुलवधूर्देवयजनसम्भवा सीतादेवी परित्यक्ता(१)मिति कथं भवन्तो मन्यन्ते । [ण]

लव । एवमाख्याय्याऽरुन्धत्या निर्भर्त्सिताः प्रजाः कृत्स्नश्च भूतग्राम आर्य्यां नमस्करोति, लोकपालाश्च सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्ते । (त)

त्वं न च स्नुषमाना अरुन्धत्या मम समीपे समर्पिता न्यस्ता । सीतां यदि दूषिता भवेत् तर्हि आज्ञया वसुन्धरया च कथमपि न प्रशस्येत, नवा ममान्तिके समर्प्येतेति भावः । मम अरुन्धत्या इत्यनेनात्मनोऽपि सतीश्रेष्ठत्वं व्यज्यते । अपि चेति चार्थः । पूर्वं रावणवधानन्तरम् लङ्कायामग्निप्रवेशे सति वैश्वानरेण अग्निदेवेन निर्णीतं निश्चितं निश्चित्य प्रख्यापितमित्यर्थः पुण्यं पवित्रं चारित्रं पतिव्रतात्वं यस्याः सा, तस्मिन्नेव च काले सब्रह्मकैः ब्रह्मणा सहितैः देवैरिन्द्रादिभिः संस्तुता पतिव्रताप्रधानत्वेन परिचिता अभ्यर्हिता वा आसीदित्यर्थः । सा सावित्रकुलवधूः सूर्यवंशीयस्नुषा देवयजनसम्भवा यज्ञभूमिसमुत्पन्ना एतेनापि नितान्तनिर्दोषत्वम् व्यज्यते, सीतादेवी परित्यक्ता रामेणेति शेषः, इति अस्मिन् विषये कथं भवन्तो मन्यन्ते भवतां किमभिप्रायं भवति । तदहमवगन्तुमिच्छामीति भावः । ईदृस्याः सतीशिरोमणेः सीतायाः परिग्रहविषये साधारणप्रजानां सम्मतिजिज्ञासया तासां पूर्वकृतसीतापवादहेतुभूतधृष्टतायाः सुमहान् तिरस्कारो व्यज्यते ।

(त) लवेति । एवमनेन प्रकारेण सम्मतिजिज्ञासयेत्यर्थः । निर्भर्त्सिताः तिरस्कृताः । कृत्स्नः सकलः भूतग्रामः प्राणिसमूहश्च आर्य्यां सीतां नमस्करोति सतीशिरोमणित्वेनाङ्गीकारात् पूजयतीत्यर्थः । पूर्वं धृष्टतया सीताया अपवादविधानेन लज्जावशात् किमपि स्पष्टमभिधातुं नार्हतीति भावः । एतेन इदानीं सीतायाः पुनः परिग्रहे काचिदपि प्रजानामापत्तिर्नास्तीति व्यज्यते । लोकपाला इन्द्रादयो दिक्पालाः सप्तर्षयो मरीच्यादयः । उपतिष्ठन्त इति पथ्याराधनयोर्थ्यात्मनेपदम्

(१) परित्यज्यत इति पाठान्तरम् ।

अरु । जगत्पते ! रामचन्द्र !

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे ॥१८॥

सीता । स्वगतम् । जाणादि अज्जउत्तो सीदादुक्खं पमज्जिदुं । [थ]

रामः । यथा भगवत्यादिशति । [द]

लक्ष्म । कृतार्थोऽस्मि । [ध]

सीता । जीविदह्मि । (न)

(थ) जानात्यार्य्यपुत्रः सीतादुःखं प्रमार्ष्टुम् ।

(न) जीवितास्मि ।

नियोजयेति । हे जगत्पते रामचन्द्र ! त्वं हिरण्मय्याः स्वर्णमय्याः प्रतिकृतेः प्रतिमायाः पुण्या पतिव्रताप्रधानत्वेन पवित्रा प्रकृतिः मूलभूता तां प्रियां दयितां सीताम् अध्वरे प्रक्रान्ताश्वमेधयज्ञे धर्मचारिणीं सहधर्म्मिणीं यथाधर्मं धर्ममनतिक्रम्य नियोजय संस्थापय । मुख्यालाभे प्रतिनिधिः शास्त्रार्थं इति न्यायात् मुख्यालाभे प्रतिनिधिविधानस्यान्याय्यत्वात् इमामेव सहधर्म्मिणीं कृत्वा अश्वमेधयज्ञं निष्पादयेति भावः । पुण्यप्रकृतिमित्यनेन सीतया सह अश्वमेधकरणे फलभूयस्त्वमपि व्यज्यते ॥१८॥

(थ) सीतेति । प्रमार्ष्टुं दूरीकर्त्तुम् । अतएव मन्ये पुनः परित्यज्य कामपि आपत्तिं न करिष्यतीति भावः ।

(द) राम इति । भगवती अरुन्धती यथा आदिशति तथैव करोमीति वाक्यशेषः । गुरुनियोगस्यानतिक्रमणीयत्वात् पुनरपि सीतां परिग्रहीष्यामि इति भावः ।

(ध) लक्ष्मेति । कृतार्थोऽस्मि, सीतारामयोः पुनर्मिलनेन सर्वेषामेव परमनिर्वृतिलाभादिति भावः ।

(न) सीतेति । जीवितास्मि, प्राणानामिव प्रियतमस्य विरहेण मृतप्राया खल्वितः पूर्वमासम्, इदानीं पुनर्लाभेन पुनर्जीवितवास्मीति भावः । अत प्रतीयमानोत्प्रेक्षा ।

लक्ष्म॰। आर्य्ये ! एष निर्लज्जो लक्ष्मणः प्रणमति। (प)

सीता। वच्छ ! ईदिसो वि चिरं जीव। (फ)

अरु॰। भगवन् वाल्मीके ! उपनीयेतामिमौ सीतागर्भसम्भूतौ रामभद्रस्य पुत्रकौ कुशलवौ। इति निष्क्रान्ता। (ब)

(क) वत्स ! ईदृशोऽपि चिरं जीव।

(प) लक्ष्मेति। निर्लज्जो लज्जाहीनः। प्रणमति भवतीमिति शेषः। यो खलु निर्दयदारुणप्रकृतिर्भवतीमतिभयानके निर्जनारण्ये विहाय प्रस्थितः, स पुनर्यदिदानीं निःसङ्कोचं मुखं प्रदर्शयन् प्रणामायागन्तुमर्हति तस्य लज्जालेशोऽपि नास्तीति मन्तव्यमिति भावः।

(फ) सीतेति। ईदृशोऽपि एवम्भूतो निर्लज्जः सन्नपि चिरं जीव। मम निर्वासने तव स्वारसिकेच्छाभावात् आर्य्यपुत्रादेशेनैव तद्विधानात् तव तव न कापि निर्दयता मया त्वां प्रति किमपि मम मनोमालिन्यमस्ति, प्रत्युत अग्रजादेशेन दुष्करस्यापि कर्म्मणः करणात् योग्यधर्म्मानुसरणेन यथापूर्वं सन्तोष एवेति भावः।

(ब) अरु इति। इमौ अन्तराले दृश्यमानौ उपनीयेतां उपस्थाप्येतां सीतारामयोः समीप इति शेषः।

अत्रैव गर्भाङ्कसमाप्तिरित्युन्नेयम्। तथा चात्र प्रविश्य सूत्रधार इत्यादिः विश्वम्भरात्मजा देवीतिश्लोकान्ता प्रस्तावना, साहं दाणिं मन्दभाइणी भाइरहीए अत्ताणं खिविस्सं इति बीजं प्रथमनन्यत्वेऽपि परं बाहुल्यात् पृथिवीगङ्गयोरभिप्रायानुसारेण अरुन्धत्या करिष्यमाणसीतारामसम्मेलनरूपफलस्य प्राथमिकहेतुत्वाच्च। तदेव च सीतारामयोः सम्मेलनं फलम्। पृथिवीगङ्गाऽरुन्धतीनाम् गर्भाङ्कपात्राणां क्रमशो निष्क्रमणेन सामान्याङ्कलक्षणस्यापि सङ्गतिः, अरुन्धत्या निष्क्रमणेन चाङ्कविशेषस्य समाप्तिसूचनञ्चेति। सीताकुशलवानान्तु गर्भाङ्कमूलसमागमाङ्गीभवप्राबल्यमङ्गीकृतम् कविनेति। पृथिवीगङ्गयोः, सम्मेलनात् पूर्वं सीतायाः, अरुन्धत्याश्च उक्तिप्रत्युक्त्यश्च एव गर्भाङ्कशरीरम्, रामलक्ष्मणादीनामुक्तिप्रत्युक्तयस्तु अभिनयदर्शनेन तायाः

रामलक्ष्मणौ । दिष्ट्या (१) तथैव तत् । (भ)

सीता । सवाष्पाकूतम् । कहिं ते पुत्तआ मे । (म)

ततः प्रविशति वाल्मीकिः कुशलवौ च ।

वाल्मी । वत्सौ कुशलवौ ! एष रघुपतिः पिता युवयोः, लक्ष्मणः कनिष्ठतातः, सीतादेवी जननी, एष राजर्षिर्जनको मातामहः । (य)

सीता । सकरुणाद्भुतं विलोक्य । कधं तादो । (र)

(म) कस्मिन् तौ पुत्रकौ मे ।

(र) कथं तातः ।

मिदानीन्तनसम्भ्रानामालोचनेन न गर्भाङ्कत्वीर' किन्तु मूलसप्तमाङ्कशरीरमेवेति बोध्यम् । अत्र गर्भाङ्कलक्षणं यथा साहित्यदर्पणे

'अङ्कोदरप्रविष्टो यो रङ्गद्वारमुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि ॥"

लक्षणे आमुखं प्रस्तावना । बीजलक्षणमपि तत्रैव

'अल्पमात्रं समुद्दिष्टं बहुधा यत् विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥"

(भ) रामेति । दिष्ट्या सौभाग्येन, तत् कुशलवयोरितिवृत्तं तथैव यथा चिन्तितं तद्रूपमेव, कुशलवौ सीतासन्तानाविव्यस्माकमनुमानं सत्यमेवेत्यर्थः ।

(म) सीतेति । बाष्पेण आनन्दाश्रुणा आकूतेन पुत्रदर्शनाभिप्रायेण च सह वर्त्तमानमिति सबाष्पाकूतम् । तौ सन्त्यागं यावत् मया पोषितौ ।

(य) वाल्मीकीति । जनकोऽपि वाल्मीकेराह्वानादभिनयदर्शनार्थमेव तत्रागत इति बोध्यम् ।

(र) सीतेति । जनको द्रष्टव्य इति "कधं", निर्वासितकालीनदुःखस्मरणेन

---

(१) हन्तेति पाठान्तरम् ।

कुशलवौ । हा तात ! हा अम्ब ! हा मातामह ! । (ल)

रामः । सहर्षमालिङ्ग्य । ननु वत्सौ ! पुण्यैः प्राप्तौ स्थः (व)

सीता । एहि जाद कुश ! एहि जाद लव ! चिरस्स परिस्सजध पुणो जम्मन्तरगदं जणणिम् । (श)

कुमारौ । तथा कृत्वा । धन्यौ स्वः । (ष)

सीता । भअवं ! पणमामि । (स)

वाल्मीकी । वत्से ! ईदृश्येव चिरं भूयाः । (ह)

(श) एहि जात कुश ! एहि जात लव ! चिरस्य परिष्वजेथां पुनर्जन्मान्तरगतां जननीम् ।

(स) भगवन् ! प्रणमामि ।

करुणा शोकः, अचिन्तितपूर्वः पितुः साक्षात्कार इत्यद्भुतमाश्चर्यं तैः सह वर्त्तमानमिति तथोक्तम् । कथमिति हर्षद्योतकमव्ययम् ।

(ल) कुशेति । सविषादसम्बोधने हाशब्दः । इयन्ति वयांसि यावदावां कुतोऽपि तातादीन् न जानीव इत्यतो विषाद इति प्रत्येतव्यम् ।

(व) राम इति । सम्बोधने ननुशब्दः । पुण्यैः प्राक्तनधर्म्मैः प्राप्तौ स्थः युवामिति शेषः । सञ्चितपुण्यानि विना युवयोः प्राप्ताववपर उपायो नाभ्याकमासीदिति भावः ।

(श) सीतेति । चिरस्य परिष्वजेथां बहून् कालान् व्याप्य आलिङ्गतं जन्मान्तरगतां पातालात् पुनर्भूतलप्राप्तत्वेन अन्यत् जन्म प्राप्तामित्यर्थः ।

(ष) कुमाराविति । तथा कृत्वा आलिङ्ग्येत्यर्थः । धन्यौः स्व आवाम् । जनन्या लाभादिति भावः ।

(स) सीतेति । प्रणमामि भवन्तमिति शेषः ।

(ह) वाल्मीकीति । ईदृश्येव पतिपुत्रसङ्गतैव चिरं भूयाः, न पुनः कदापि पूर्ववत् पतिपुत्रविरहिणी भूया इत्येवशब्दार्थः ।

सीता। अम्महे! तादो, कुलगुरू, अज्जाजणो, सभत्तुआ अज्जा सन्तादेई, सलक्खणा सुप्पसण्णा अज्जउत्तचलणा समं कुसलवावि दीसन्ति, ता णिब्भरह्मि आणन्देण। [च]

नेपथ्ये कलकलः।

वाल्मी। उत्थायावलोक्य च। उपहतलवणो [१] मथुरेश्वरः प्राप्तः। [क]

लक्ष्म। सानुषङ्गाणि कल्याणानि। [ख]

(ख) अम्महे। (आश्चर्य्यम्) तातः, कुलगुरुः, आर्य्याजनः सभर्तृका आर्य्या शान्तादेवी, सलक्ष्मणाः सुप्रसन्ना आर्य्यपुत्रचरणाः, समं कुशलवावपि दृश्यन्ते तन्निर्भराऽस्मि आनन्देन।

(च) सीतेति। "अम्महे इत्येकमेव विस्मयसूचकमव्ययं शौरसेन्यादिभाषायाम्। तातो जनकः, कुलगुरुर्वशिष्ठः, आर्य्याजनः कौशल्यादिश्वश्रूजनः, भर्त्रा ऋष्यशृङ्गेण सह वर्त्तमाना सभर्तृका। सलक्ष्मणाः लक्ष्मणेन सहिताः सुप्रसन्नाः रोषकालुष्यरहिताः सन्तोषसौम्या इति यावत् आर्य्यपुत्रचरणाः एतासु महागुरुत्वेन चरणशब्दोपन्यासः, अन्यासु महागुरुत्वाभावात् न तथेति बोध्यम्। अपिशब्दः समुच्चये कुशलवौ चेत्यर्थः, समं युगपत् एते दृश्यन्ते, तत्तस्मात् आनन्देन निर्भरा परिपूर्णास्मि।

(क) वाल्मीकीति। उपहतो निहतो लवणो मधुदैत्यपुत्रो लवणाख्यराक्षसो येन स तथोक्तः, मथुरेश्वरः शत्रुघ्नः प्राप्त उपस्थितः। तत्सेनाया अयं कलकल इति भावः लवणराक्षसवधवृत्तान्तो वाल्मीकिना पूर्वं लोकपरम्परया तपःप्रभावेण वाऽवगत इति मन्तव्यम्।

यमुनातीरवासिनां मुनीनां प्रार्थनया रामेण प्रेषितः शत्रुघ्नः कुम्भीनसीगर्भजातं मधुदैत्यपुत्रं लवणराक्षसं निहत्य रामस्यैवानुज्ञया मधुदैत्याधिकृतमथुराराज्ये राजत्वमकार्षीदिति रामायणवार्त्ताऽत्रानुसन्धेया।

(ख) लक्ष्मेति। अनुषङ्गेण अनुचरेण सजातीयेतरेणेत्यर्थः सह वर्त्तमानानि

---

(१) उतखातलवण इति क्वापि पाठः।

रामः। सर्वमिदमनुभवन्नपि न प्रत्येमि, यद्वा प्रकृतिरियमभ्युदयानाम्! [ग]

वाल्मी। रामभद्र! उच्यतां, किन्ते भूयः प्रियमुपकरोमि। [घ]

रामः। अतःपरमपि प्रियमस्ति। तथापीदमस्तु। [ङ]

कानुषङ्गाणि, कल्याणानि मङ्गलानि, कल्याणानि कल्याणान्तरैः सह उपतिष्ठन्तीत्यर्थः। यदत्र सर्वेषां बन्धूनां सम्मिलनकाले वत्सः शत्रुघ्नोऽपि प्राप्तः सुतरां 'सम्पत् सम्पदमनुबध्नाति विपच्च विपद"मिति लोकवादो यथार्थ एवेति भावः।

(ग) राम इति। सर्वमिदं सम्मिलनसुखमित्यर्थः अनुभवन्नपि प्रत्यक्षीकुर्वन्नपि न प्रत्येमि न विश्वसिमि। नितान्तदुर्भाग्यस्य मे ईदृक् सुखसागरोद्वेलनस्य प्रायेणासम्भावनीयत्वादिति भावः। ननु निर्दोषप्रत्यक्षत्वेऽपि कथमविश्वास इत्याह यद्वेति। यद्वा अथवा अभ्युदयानां सुखसमृद्धीनाम् इयं प्रकृतिः स्वभावः, यत् यौगपद्येन सर्वाः समुदाय आविर्भवन्तीति वाक्यशेषः। अत ईदृक् सुखपरम्परा सत्यं सम्भवत्यपीति भावः।

(घ) वाल्मीकीति। भूयः पुनः ते तव किं प्रियं प्रीतिकरं कार्य्यम् उपकरोमि विदधामि तदुच्यतामित्यर्थः। 'भूयः (अ) पुनरर्थे"मिति शब्दकल्पद्रुमः।

(ङ) राम इति। अपिशब्दः प्रश्ने। अतः परं सपुत्रपत्नीलाभादधिकम् अपि किम् प्रियं प्रीतिकरं वस्तु अस्ति, अपि तु नेत्यर्थः। स च भवता कृत इति भावः। तथापि पुत्रसहितपत्नीलाभादधिकप्रियाऽसत्त्वेऽपि इदं वक्ष्यमाणम् अस्तु भवतु भवदनुग्रहादिति शेषः।

अथवा अतः परमपि पुत्रसहितभार्य्यालाभादधिकमपि प्रियं वस्तु अस्ति। तच्च वक्ष्यम् अविनश्वरत्वात् निरवच्छिन्नसुखत्वाच्चेति भावः। तथापि अविनश्वरनिरवच्छिन्नसुखजनकं वस्तु सत्यपि इदं वक्ष्यमाणम् अस्तु। यतः सुखादिभोगलालसाया अनिवृत्तत्वात् इदानीमेव न मया मुक्तिः प्रार्थ्यते, किन्तु सुखान्तरमिति भावः।

पाप्मभ्यश्च पुनातु वर्धयतु च श्रेयांसि सेयं कथा [१]
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।

तत्प्रार्थनीयमाह पाप्मभ्य इति । माता जननीव गङ्गा भागीरथीव च जगतो भुवनस्य मङ्गल्या मानानीतिधर्मविषयनिबन्धनात् शुभजनिका, मनोहरा शोभना च कौतूहलोद्दीपकविविधोपाख्यानपूर्णत्वात् हृदयाह्लादकारिणीत्यर्थः सा प्रसिद्धा इयं कथा भवदीयरामायणप्रबन्धः पाप्मभ्यः कुत्सितपापेभ्यः पुनातु शुद्धान् करोतु तथा पापविनाशेन जनान् पवित्रीकरोतु इत्यर्थः, तथा श्रेयांसि लोकानां मङ्गलानि च वर्धयतु बहुलीकरोतु । प्रजानां पापहीनत्वं मङ्गलबाहुल्यं च राज्ञोऽपि तत्फलभागित्वादिदानीं भवदन्तिके ममैतदेव प्रार्थनीयमिति भावः । नन्वनालोचिता सा कथा, कथं पुनीयात् कथं वा श्रेयांसि वर्धयेदित्याह तामेतामिति । बुधा विद्वांसः शब्दब्रह्मविदः सम्यगर्-शब्दतत्त्वज्ञा इत्यर्थः; कथमन्यथा ईदृशी शब्दरचनाचातुरी स्यादिति भावः, एतेन पदमाधुर्यदर्शनेनापि तेषां सुमहानानन्दो भवितेति व्यज्यते । परिणता परिपक्वा उन्नतिशरमसीमामारूढेत्यर्थः; प्रज्ञा बुद्धिर्यस्य तस्य परिणतप्रज्ञस्य कथमन्यथा ईदृशं भावमाधुर्यमुपपद्येत इति भावः, भावमाधुर्येणापि बुधा मुद्यन्तु इति व्यज्यते; कवेर्वाल्मीकेर्भवतः तां प्रसिद्धाम् एताम् इदानीमेव कियदंशे समभिनीताम्, इमाम् अस्मदादिभिरपि प्रत्यक्षीकृतां वाणीं रामायणात्मकमहावाक्यं विन्यस्तम् अर्पितं इदम् अभिनयोपयोगिनी माकृतिर्यस्याः तां विन्यस्तरूपां सतीं स्वयं स्वयमेव नाटकाद्याकारतया परिणमय्येत्यर्थः; अभिनयैः रघुदशरथादिरामायणकथापुरुषाणामवस्थानुकरणैः परिभावयन्तु सर्वतोभावेन सम्मानयन्तु । इदमेव रामायणमवलम्ब्य नाटकादिकं विरचय्य तदभिनयेनास्य गौरवं वर्धयन्त्विति सरलार्थः । तेन च भवतः कवित्वं सूर्यवंशस्य कीर्त्तिगौरवञ्च लोके प्रथितं सत् महान्तमानन्दं जनयेत्, इयञ्च द्वितीयप्रार्थनेति भावः ।

अत्र मङ्गल्यत्वमनोहरत्वयोरुपमानोपमेयोभयधर्मत्वात् पूर्णोपमाऽलङ्कारः । तथा माता गङ्गा च पुनाति रामायणकथा तु पुनात्विति प्रक्रमभङ्गात् "चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथे"ति साहित्यदर्पणोदाहृतवत् भग्नप्रक्रमतादोषः तेन च 'पाप्मभ्यश्च

(१) पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि येयं कथेति पाठान्तरम् ।

तामेतां[१] परिभावयन्त्वभिनयैर्विन्यस्तरूपां[२] बुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥२०॥

इति निष्क्रान्ताः सर्वे ।

इति सम्मेलनं नाम सप्तमोऽङ्कः ॥(च)

समाप्तमिदं महाकविभवभूतिविरचितमुत्तररामचरितं नाम नाटकम् ॥०॥

पुनाति वर्द्धयति च श्रेयांसि येयं कथे"ति पाठान्तरमेव साधीयः, किन्तु बहुषु पुस्तकेष्वदर्शनात् तन्न सन्निवेशितमिति ज्ञेयम्। किञ्च एताम् इमामिति प्रायेण कार्ययोः पदयोरुपन्यासात् कथितपदतादोषः, स च वाणीं चिरमिति पाठेन समाधेयः।

अत्रायं वस्तुध्वनिः, बुधाः पण्डिताः शब्दब्रह्मविदः परिणतप्रज्ञस्य विन्यस्तरूपां नाटकाकारेण परिणमितां कवेर्भवभूतेः वाणीम् उत्तररामचरितलक्षणनाटकात्मकमहावाक्यम् अभिनयैः परिभावयन्तु सर्वतोभावेन सम्मानयन्त्विति।

परिभावयन्त्विति परिशब्दः सर्वतोभावार्थे "परि (अव्य) सर्वतोभावः" इति शब्दकल्पद्रुमः। शब्द एव ब्रह्म तद्वेत्तीति शब्दब्रह्मवित् तस्य। शब्दस्य ब्रह्मत्वमाह श्रुतिः 'चत्वारि शृङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासः त्रिधाबद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेशे"ति।

अभिनयलक्षणमुक्तं साहित्यदर्पणे—

> 'भवेदभिनयोऽवस्थाऽनुकारः स चतुर्विधः।
> आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा।"

शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

(च) इतीति। सम्मेलनं नाम सम्मेलनमिति नाम्ना प्रसिद्धः। सप्तमोऽङ्कः समाप्त इति शेषः।

---

(१) वाल्मीकेरिति क्वापि पाठः। (२) विन्यस्तरूपा इति पाठभेदः।

जानकीविक्रमं नाम नाटकं वीररौद्रवत् ।
नाटिकामुज्ज्वलरसां श्रीविराजसरोजिनीम् ॥
वियोगवैभवाख्यानं खण्डकाव्यमनन्तरम् ।
नानाबन्धं महाकाव्यं रुक्मिणीहरणाभिधम् ॥
स्मृतिचिन्तामणिं नाम कृत्वा च स्मृतिसंग्रहम् ।
निर्म्मिमाणो गद्यकाव्यमपूर्वं सरलाह्वयम् ॥
कोटालिपाड़नगरीनिशिवास्त्रवासात्
सत्काश्यपः पुरि नवीपुर एत्य तिष्ठन् ।
वेदाग्निनागविधुमानशकाब्दपौष्यां
श्रीमान् समापयदिमां हरिदासशर्म्मा ॥
दोषान्वितामपि रतामपरप्रकाशि
टीकामिमां गुणिजनो ध्रुवमाद्रियेत ।
गङ्गाधरो गुणसमुच्चयवान् गुणज्ञो
दोषाकरस्य हि कलां शिरसैव धत्ते ॥

इति श्रीगङ्गाधरविद्यालङ्कारभट्टाचार्य्यात्मज-श्रीहरिदास-सिद्धान्तवागीश-
भट्टाचार्य्यविरचितायामुत्तररामचरितनाटकटीकायां
सर्वार्थबोधिनीसमाख्यायां सप्तमाऽङ्क-
विवरणं समाप्तम् ॥

—:०:—

উত্তররামচরিত।

প্রথম অঙ্ক।

প্রাচীন কবি বাল্মীকিপ্রভৃতিকে নমস্কার করিয়া, আমি ইহা প্রার্থনা করি যে, পরমাত্মার অংশস্বরূপা ও অমৃতের ন্যায় সুরসা বাগ্‌দেবীকে যেন লাভ করিতে পারি ॥ ১ ॥

নান্দীপাঠের পর সূত্রধার। অতিবিস্তৃত নান্দীপ্রয়োগে প্রয়োজন নাই। অদ্য ভগবান্ কালপ্রিয়নাথের বার্ষিক মহোৎসবে সভ্য মহোদয়দিগকে আমি ইহা জানাইতেছি যে, আপনারা এইরূপ অবগত হউন,— কাশ্যপগোত্র শ্রীকণ্ঠউপাধিক ভবভূতি নামে মাননীয় একজন কবি আছেন।

এই বাগ্‌দেবী, বশতাপন্ন হইয়াই যেন, যে ব্রাহ্মণের আনুগত্য করেন, তাঁহার প্রণীত উত্তররামচরিত নাটক আমরা অভিনয় করিব ॥২॥

প্রয়োজন বশতঃ এই আমি অযোধ্যানিবাসী ও তৎকালবর্ত্তী হইলাম। (সকল দিকে দৃষ্টিপাত করিয়া) ওহে! ওহে! জগদ্বন্দনীয় এবং রাবণবংশের ধূমকেতুস্বরূপ মহারাজ রামচন্দ্রের ইহাই যদি অভিষেকের সময় হইয়া থাকে এবং দিবারাত্রি আমোদালাপের বিরাম না হইতে থাকে; তবে রঙ্গালয়ের প্রাঙ্গণে নটগণ বিরত রহিয়াছেন কেন?।

নট। (প্রবেশ করিয়া)। শিক্ষকমহাশয়! তাহার কারণ এই যে, মহারাজ, লঙ্কাযুদ্ধে সাহায্যকারী মহাত্মা বানরগণ ও রাক্ষসগণকে এবং

আপ্যায়িত করিবার জন্য উপস্থিত নানা দিক হইতে আগত ব্রহ্মর্ষিগণ ও রাজর্ষিগণকে এই অযোধ্যানগর হইতে পাঠাইয়া দিয়াছেন; যাঁহাদের প্রীতিবিধানের নিমিত্ত এতদিন যাবৎ উৎসব হইতেছিল।

আরও কারণ আছে। রামচন্দ্রপ্রভৃতির মাতা কৌশল্যাদেবী প্রভৃতি, অরুন্ধতীদেবীকে অগ্রে অগ্রে করিয়া, বশিষ্ঠের সঙ্গে যজ্ঞ উপলক্ষ্যে, জামাতার আশ্রমে গিয়াছেন ‖ ৩ ‖

সূত্রধার। আমি বিদেশী বলিয়া জিজ্ঞাসা করিতেছি,—ঐ জামাতা আবার কে?।

নট। রাজা দশরথ, শান্তা নামে একটি কন্যা উৎপাদন করিয়াছিলেন; যাহাকে কৃত্রিমকন্যারূপে রাজা লোমপাদকে দিয়াছিলেন ‖ ৪ ‖

মহর্ষি বিভাণ্ডকের পুত্র ঋষ্যশৃঙ্গ তাহাকে (শান্তাকে) বিবাহ করেন; তিনি (ঋষ্যশৃঙ্গ) এখন দ্বাদশ-বর্ষ নিষ্পাদ্য একটী যজ্ঞ আরম্ভ করিয়াছেন, তাহার (ঋষ্যশৃঙ্গের) অনুরোধে কৌশল্যাপ্রভৃতি গুরুজনবর্গ, পূর্ণগর্ভা সীতাদেবীকেও ছাড়িয়া সেই স্থানে গিয়াছেন।

সূত্রধার। তা, এ আলোচনায় প্রয়োজন কি? আইস, নিজজাতীয় নিয়মানুসারে আমরা রাজদ্বারেই উপস্থিত হই।

নট। তাহা হইলে, শিক্ষকমহাশয়, রাজার সম্বন্ধে বিশুদ্ধ একটি স্তুতিবাক্য (মনে মনে) স্থির করুন।

সূত্রধার। নট!

যে বিষয় সর্ব্বদা ব্যবহৃত হইয়া থাকে, তাহাতে সর্ব্বপ্রকারে অনিন্দনীয়তা হইবে কি রূপে?। মানুষ, যেমন স্ত্রীলোকের তেমন বাক্যের সাধুতার প্রতি দুর্জ্জন হইয়া থাকে (স্ত্রীলোকের ন্যায় বাক্যের উপরেও অনর্থক দোষারোপ করিয়া থাকে) ‖ ৫ ‖

নট। অতিশয় দুর্জ্জন হয়, ইহাই বলা উচিত।

যে হেতু লোক, সীতাদেবীরও অপবাদ করিয়া থাকে; রাক্ষসগৃহে অবস্থিতিই তাহার মূল; কিন্তু অগ্নিপরীক্ষায় নির্দোষতা প্রমাণ হইলেও, লোকের মনে তাহা নিশ্চয় হয় নাই। ॥ ৬ ॥

সূত্রধার। এই কিংবদন্তী যদি মহারাজকে স্পর্শ করে (মহারাজের কাণে যায়), তবে তাঁহার অত্যন্ত কষ্ট হইবে।

নট। ঋষিগণ ও দেবতাগণ সর্বপ্রকারে মঙ্গল করিবেন। (কতিপয় পদক্ষেপ করিয়া) ওহে! মহারাজ এখন কোথায়? (শুনিয়া) লোকে এইরূপ বলিতেছে।

মহারাজ জনক, আপ্যায়িত করিবার জন্য আসিয়া, এই কয় দিন উৎসবে অতিবাহিত করিয়া, আজ বিদেহদেশে গিয়াছেন। সেই কারণে বিষণ্ণচিত্ত সীতাদেবীর সান্ত্বনার জন্য, মহারাজ (রামচন্দ্র) বিচারালয় হইতে বাসগৃহে প্রবেশ করিতেছেন ॥ ৭ ॥

(ইহার পর উভয়ে চলিয়া গেল)

প্রস্তাবনা।

—০—

প্রথম অঙ্ক।

(তদনন্তর আসনস্থ অবস্থায় রাম ও সীতার প্রবেশ।)

রাম। দেবি! আশ্বস্ত হও। কারণ, সেই গুরুজনবর্গ আমাদিগকে ছাড়িয়া বহুকাল থাকিতে পারিবেন না।

তবে বেদোক্ত কার্য্যের অবশ্যকর্ত্তব্যতা, স্বাধীনতা লোপ করে। সুতরাং সাগ্নিকদিগের গৃহান্তরে অবস্থান, প্রত্যবায় দ্বারা বিঘ্নিত (সাগ্নিকগণ, পাপ হইবার ভয়ে দীর্ঘকাল অন্যস্থানে থাকিতে পারেন না) ॥ ৮ ॥

সীতা। জানি, আর্য্যপুত্র! জানি। কিন্তু বন্ধুজনের বিচ্ছেদ, সন্তাপ জন্মাইয়া থাকে।

রাম। ইহা আমিও স্বীকার করি। সংসারের এই সকল অবস্থা, হৃদয়ের মর্ম্মস্থান ছেদ করে; জ্ঞানিগণ, সংসারের যে সকল অবস্থা হইতে বিরক্ত হইয়া, সমস্ত কামনা পরিত্যাগ করিয়া, বনে যাইয়া বিশ্রাম করেন।

কঞ্চুকী (প্রবেশ করিয়া)। রামভদ্র! (এই অর্দ্ধোক্তির পর আশঙ্কার সহিত) মহারাজ!।

রাম। (ঈষৎ হাস্যের সহিত) আর্য্য! আমার প্রতি পিতার পরিজনবর্গের 'রামভদ্র!' এইরূপ ব্যবহারই শোভা পায়; সুতরাং অভ্যাস অনুসারেই বলিবেন।

কঞ্চুকী। দেব! ঋষ্যশৃঙ্গের আশ্রম হইতে অষ্টাবক্র আসিয়াছেন।

সীতা। আর্য্য! তবে বিলম্ব করিতেছেন কেন?।

রাম। শীঘ্র প্রবেশ করান।

কঞ্চুকী। (চলিয়া গেলেন)

অষ্টাবক্র। (প্রবেশ করিয়া) আপনাদের মঙ্গল হউক।

রাম। ভগবন্! নমস্কার করি। এই স্থানে উপবেশন করুন।

সীতা। ভগবন্! আপনাকে নমস্কার করি। জামাতার সহিত গুরুজনবর্গের এবং আর্য্যা শান্তাদেবীর মঙ্গল ত?।

রাম। সোমপায়ী আমার ভগিনীপতি ভগবান্ ঋষ্যশৃঙ্গ এবং আর্য্যা শান্তাদেবী নির্বিঘ্নে আছেন ত?।

সীতা। আমাদিগকে স্মরণ করিতেছেন ত?।

অষ্টাবক্র। (উপবেশন করিয়া) হাঁ; দেবি! কুলগুরু ভগবান্ বশিষ্ঠ, আপনাকে ইহা বলিয়াছেন।

ভগবতী পৃথিবী, তোমাকে প্রসব করিয়াছেন; প্রজাপতির তুল্য রাজা জনক, তোমার পিতা এবং হে নন্দিনি! তুমি সেই রাজগণের কুলবধূ, যাঁহাদের বংশে সূর্য্যদেব এবং আমরা গুরু॥ ৯॥

সুতরাং অন্য কি আশীর্বাদ করিব; কেবল বীরপ্রসবিনী হও।

রাম। অনুগৃহীত হইলাম।

কারণ; প্রাকৃত সাধুদিগের বাক্য, অর্থের অনুসরণ করে; কিন্তু অর্থ, প্রাচীন ঋষিদিগের বাক্যের অনুগামী হয়॥ ১০॥

অষ্টাবক্র। ভগবতী অরুন্ধতী, দেবী কৌশল্যাপ্রভৃতি এবং শান্তাদেবী, ইহা বার বার বলিয়া পাঠাইয়াছেন,—'গর্ভকালীন ইঁহার (সীতাদেবীর) যে কোন অভিলাষ হইবে, অচিরাৎ তাহা অবশ্যই সম্পাদন করিবে।

রাম। করি; যদি ইনি বলেন।

অষ্টাবক্র। সীতাদেবীর ননদের পতি ঋষ্যশৃঙ্গ, বলিয়া পাঠাইয়াছেন,—'বৎসে! তুমি পূর্ণগর্ভা বলিয়া তোমাকে আনি নাই; বৎস রামভদ্রকেও তোমার সান্ত্বনার জন্যই রাখিয়াছি। অতএব পুত্রপূর্ণ ক্রোড় অবস্থায় তোমাকে দেখিব।

রাম। (আনন্দবশতঃ ঈষৎ হাস্যের সহিত) তাহাই হউক। ভগবান্ বশিষ্ঠ আমাকে কি আদেশ করিয়াছেন?।

অষ্টাবক্র। শুনুন।

আমরা জামাতার যজ্ঞে আবদ্ধ হইয়াছি ; তুমি বালকই বট ; রাজ্যও নূতন। সুতরাং তুমি প্রজার অনুরঞ্জনে মনোযোগী হইবে ; তাহাতে যে যশ হইবে, তাহাই তোমাদের পরম ধন ॥ ১১ ॥

রাম। ভগবান্ বশিষ্ঠ, যথার্থই বলিয়াছেন।

লোকের সন্তোষের নিমিত্ত, স্নেহ, দয়া, সুখ, এমন কি সীতাকেও পরিত্যাগ করিতে আমার দুঃখ নাই ॥ ১২ ॥

সীতা। এই জন্যই আপনি, রঘুবংশের ধুরন্ধর।

রাম। এখানে কে, কে আছ হে? ভগবান্ অষ্টাবক্রকে বিশ্রাম করাও।

অষ্টাবক্র। (উঠিয়া, কতিপয় পদক্ষেপ করিয়া) ওহে! কুমার লক্ষ্মণ উপস্থিত হইয়াছেন। (এই বলিয়া চলিয়া গেলেন)

লক্ষ্মণ। (প্রবেশ করিয়া) আর্য্যের জয় হউক, আর্য্যের জয় হউক। আর্য্য! আমাদের উপদেশ অনুসারে সেই চিত্রকর, আপনার চরিত্র, এই দেওয়ালে চিত্র করিয়াছে ; আপনি তাহা দেখুন।

রাম। বৎস! তুমি বিষণ্ণহৃদয়া দেবী সীতাকে আশ্বস্ত করিতে জা· বটে। তবে আহা (চিত্র) কোন্ পর্য্যন্ত?।

লক্ষ্মণ। আর্য্যার অগ্নিশুদ্ধিপর্য্যন্ত।

রাম। থাম।

জন্ম হইতে পবিত্র এই সীতাদেবীর পক্ষে, পবিত্রতাজনক অন্য পদার্থ দ্বারা কি হইবে?। তীর্থের জল ও অগ্নি, অন্য পদার্থ হইতে পবিত্রতা লাভ করে না ॥১৩॥

দেবি! যজ্ঞভূমিসমুৎপন্নে! প্রসন্ন হও ; এই প্রবাদ তোমার জীবন পর্য্যন্ত থাকিবে।

সৎকুলোৎপন্ন লোকের পক্ষে জন সাধারণকে সন্তুষ্ট করা কষ্টকর ;

অতএব আমাদের সম্বন্ধে যে অসুখকর কথা বলিয়াছে, তাহা তোমার পক্ষে উচিত নহে। কারণ মস্তকস্থিতিই সুগন্ধি পুষ্পের স্বভাবসিদ্ধ; কিন্তু চরণ দ্বারা তাড়ন করা স্বভাবসিদ্ধ নহে ॥১৪॥

সীতা। হউক, আর্য্যপুত্র! হউক। আসুন, আপনার চরিত্র দেখি। (এই বলিয়া, উঠিয়া পাদক্ষেপ করিতে লাগিলেন)।

লক্ষ্মণ। এই চিত্র।

সীতা। (দেখিয়া) উপরে ঘনভাবে অবস্থিত ইহারা কে? যেন আর্য্যপুত্রের উপাসনা করিতেছে।

লক্ষ্মণ। দেবি! ইহারা সমন্ত্রক জৃম্ভকাস্ত্র; যাঁহারা ভগবান্ কৃশাশ্ব হইতে বিশ্বামিত্রে আসিয়াছিলেন এবং সেই বিশ্বামিত্র আবার তাড়কা-বধের পর, আর্য্যকে (রামচন্দ্রকে) অনুগ্রহপূর্ব্বক দান করিয়াছিলেন।

রাম। দেবি! দিব্যাস্ত্রদিগকে নমস্কার কর।

ব্রহ্মাপ্রভৃতি প্রাচীন উপদেশকগণ, বেদরক্ষার নিমিত্ত,সহস্র বৎসরেরও অধিক কাল তপস্যা করিয়া, স্বকীয় তপোময় তেজস্বরূপ এই অস্ত্রগুলিকে দেখিয়াছিলেন ॥ ১৫ ॥

সীতা। ইহাদিগকে নমস্কার নমস্কার।

রাম। এখন ইহারা সর্বপ্রকারেই তোমার সন্তানের হস্তগত হইবেন।

সীতা। অনুগৃহীত হইলাম।

লক্ষ্মণ। এই মিথিলার বৃত্তান্ত।

সীতা। ওমা! এই আর্য্যপুত্রকে চিত্র করিয়া রাখিয়াছে; প্রস্ফুটিত নবনীলোৎপলের ন্যায় শ্যামবর্ণ, স্নিগ্ধ, কোমল, সুন্দর, অথচ বলিষ্ঠ দেহের সৌন্দর্য্যবশতঃ, আমার পিতৃদেব বিস্ময়ে নিশ্চল হইয়া, সুন্দর শোভা সন্দর্শন করিতেছেন; ইনি অবহেলায় হরধনু ভগ্ন করিয়াছেন এবং ইহার মুখমণ্ডল জুলপিতে বড়ই সুন্দর হইয়াছে।

লক্ষ্মণ। আর্য্যে! দেখুন!

এই আপনার পিতা এবং জনকবংশের পুরোহিত গৌতমপুত্র শতানন্দ, সম্বন্ধী বশিষ্ঠপ্রভৃতির অর্চ্চনা করিতেছেন ॥ ১৬ ॥

রাম। ইহা দেখিবার বটে। (কারণ)

জনকবংশীয় ও রঘুবংশীয়দিগের পরস্পর বিবাহসম্বন্ধ, কাহার প্রিয় নহে? যাহাতে স্বয়ং বিশ্বামিত্র, দাতা ও বটেন, গ্রহীতা ও বটেন ॥১৭॥

সীতা। সেই সময় কেশান্তসংস্কাররূপ শুভকর্ম্ম করা হইয়াছিল এবং বিবাহকার্য্যে বরণ করা হইয়াছিল, এই অবস্থায় আপনারা চারি ভাই এই। ওহে! আমি মনে করিতেছি যেন সেই স্থানে এবং সেই সময়ে রহিয়াছি।

রাম। এই রূপই বটে।

এ, যেন সেই সময়ই বর্ত্তমান (বলিয়া বোধ হইতেছে); হে সুমুখি! যে সময়ে শতানন্দ-সমর্পিত, রমণীয়কঙ্কণধারী এবং মূর্ত্তিমান্ মহোৎসবের ন্যায় তোমার এই হাতখানি আমাকে আনন্দিত করিয়াছিল ॥১৮॥

লক্ষ্মণ। এই আর্য্যা (আপনি); ইনিও আর্য্যা মাণ্ডবী, আর এই বধূ শ্রুতকীর্ত্তি।

সীতা। বৎস! এই অপর স্ত্রীলোকটী কে?।

লক্ষ্মণ। (লজ্জা ও ঈষৎ হাস্যের সহিত স্বগত) ও! আর্য্যা সীতা উর্ম্মিলার কথা জিজ্ঞাসা করিতেছেন। হউক, অন্যদিকে উঁহাদের দৃষ্টি সঞ্চারিত করি। (প্রকাশ্যে) আর্য্যে! এই দেখিবার ঘটনা দেখুন। এই ভগবান্ পরশুরাম।

সীতা। (ব্যস্ততার সহিত) কম্পিত হইয়াছি।

রাম। ঋষি! আপনাকে নমস্কার।

লক্ষ্মণ। আর্য্যে! দেখুন,—আর্য্য—(রাম) ইহাকে—(এই অর্দ্ধোক্তির পর)

রাম। (লক্ষ্মণের বাক্যে বাধা দিয়া) বৎস! বহুতর দেখিতে হইবে; সুতরাং অন্য দিক্ দেখাও।

সীতা। (স্নেহ ও আদরের সহিত দেখিয়া) আর্য্যপুত্র! আপনি এই বিনয়ের প্রভাবে সুন্দর শোভা পাইতেছেন।

লক্ষ্মণ। এই আমরা অযোধ্যায় উপস্থিত হইয়াছি।

রাম। (অশ্রুপাতের সহিত) স্মরণ করি, হায়! স্মরণ করি বটে।

পিতা জীবিত থাকিতে এবং নূতন বিবাহ হইলে, মাতৃগণ আমাদের সমস্ত কার্য্যের ব্যবস্থা করিতেন, এই অবস্থায় সে-ই আমাদের দিন গিয়াছে॥ ১৯॥

এই সীতাও, তখন সূক্ষ্ম, বিরল ও প্রান্তস্খলিত মনোহর কেশকলাপ এবং দন্তমুকুল দ্বারা সুদৃশ্য মুখমণ্ডল ধারণ করতঃ, জ্যোৎস্নার ন্যায়, অতি সুন্দর, অকৃত্রিম-বিলাস-সম্পন্ন ও মনোহর অঙ্গ দ্বারা আমার মাতৃগণের কৌতুক জন্মাইতেন॥ ২০॥

লক্ষ্মণ। এই মন্থরা।

রাম। (উত্তর না দিয়া, অন্যদিক্ দেখাইতে থাকিয়া) দেবি! বিদেহনন্দিনি!

এই সেই ইঙ্গুদীবৃক্ষ; পূর্ব্বে শৃঙ্গবেরপুরে যেখানে স্নেহশীল ব্যাধপতি গুহের সঙ্গে আমাদের সম্মেলন হইয়াছিল॥ ২১॥

লক্ষ্মণ। (হাস্য করিয়া স্বগত) ও! আর্য্য (রামচন্দ্র), মধ্যমা মাতা কৈকেয়ীর বৃত্তান্ত গোপন করিলেন।

সীতা। এই জটাবন্ধনের বৃত্তান্ত।

লক্ষ্মণ। রাজলক্ষ্মী, পুত্রের উপরে সক্রান্ত হইলে, ইক্ষ্বাকুবংশীয় প্রাচীনগণ, যে ব্রত ধারণ করিতেন; আর্য্য রামচন্দ্র বাল্যকালেই সেই পবিত্র বানপ্রস্থ ব্রত ধারণ করিয়াছিলেন॥ ২২॥

সীতা। নির্ম্মল—পবিত্রজলা প্রভাববতী গঙ্গা এই।

রাম। দেবি! রঘুকুলের দেবতা! তোমাকে নমস্কার করি। পূর্বে আমার প্রপিতামহগণ, সগররাজার যজ্ঞে অশ্বের অন্বেষণে ব্যগ্র হইয়া, ভূতল ভেদ করিয়া, (পাতালে যাইয়া) ক্রোধবশতঃ কপিলের তেজে দগ্ধ হইয়াছিলেন। হে প্রভাববতি! তাহার পর ভগীরথ, দেহপাত গণনা না করিয়া, তপস্যা করিয়া, তোমার জলস্পর্শে, চিরকালের পর তাঁহাদিগকে উদ্ধার করিয়াছিলেন ॥ ২৩ ॥

হে মাতঃ! সেই তুমি, অরুন্ধতীর ন্যায়, পুত্রবধূ সীতার প্রতি শুভানুধ্যানপরায়ণা হও।

লক্ষ্মণ। যমুনার তীরে চিত্রকূটগামী পথে, মহর্ষি-ভরদ্বাজ-নিবেদিত শ্যামনামক বটবৃক্ষ এই।

রাম। (সস্পৃহ দৃষ্টি করিতে লাগিলেন)

সীতা। আর্য্যপুত্র এই স্থান স্মরণ করিতেছেন কি?।

রাম। ওহে! কি করিয়া বিস্মৃত হইব?।

মর্দ্দিত মৃণালের ন্যায় তোমার অঙ্গসমূহ, পথের পরিশ্রমে অলস, শিথিল অথচ মনোহর হইয়াছিল এবং গাঢ় আলিঙ্গন দ্বারা আমি তাহাতে সংবাহন করিয়াছিলাম; তুমি সেই সকল অঙ্গ আমার বুকের উপরে রাখিয়া যেখানে নিদ্রা গিয়াছিলে ॥ ২৪ ॥

লক্ষ্মণ। বিন্ধ্যারণ্যের সম্মুখে এই বিরাধরাক্ষসের বৃত্তান্ত।

সীতা। ইহা দেখিয়া প্রয়োজন নাই। দক্ষিণারণ্যে নিজের প্রবেশারম্ভ দেখি; যাহাতে আর্য্যপুত্র (রাম) নিজ হস্তে তালপত্রের ছত্র ধারণ করিয়াছিলেন।

রাম। যাহাতে বনবাসিমুনিগণের আশ্রমবৃক্ষ ছিল, পার্বত্যনদীর-তীরে এই সেই সকল তপোবন; যে সকল তপোবনে অতিথিসংকার পরায়ণ ও শান্তচিত্ত গৃহী মুনিগণ, মুষ্টিপরিমিত উড়ীধান্যের তণ্ডুল পাক করিয়া (আহার করতঃ) গৃহ আশ্রয় করিয়া থাকেন ॥ ২৫ ॥

লক্ষ্মণ। জনস্থানের মধ্যবর্ত্তী এই প্রস্রবণনামক পর্ব্বত; সর্ব্বদা বর্ষণকারী মেঘসমূহ, ইহার নীলবর্ণকে বিশেষ স্নিগ্ধ করিয়াছিল এবং গোদাবরী-নদীর তরঙ্গের আঘাতে উহার গুহা, শব্দায়মান হইয়াছিল; গোদাবরী-নদীর উভয়তীরের প্রান্তভাগই বনসমূহে ব্যাপ্ত ছিল; ঘন ঘন বৃক্ষসমূহে সেই বনগুলিকে নিবিড় ও স্নিগ্ধ করিয়াছিল।

রাম। সুন্দরি! আমরা সেই পর্বতে লক্ষ্মণের পরিচর্য্যায় সুস্থভাবে ছিলাম; এই অবস্থায় আমাদের সেই দিনগুলিকে স্মরণ করিতেছ কি? আর সেখানে স্বাদুজলা গোদাবরীকে মনে করিতেছ কি? এবং গোদাবরীর নিকটে আমাদের অবস্থানের স্মরণ হইতেছে কি? ॥২৬॥

আরও; নিকট বসিয়া, আমরা অপর্য্যায়ক্রমে কোন কোন বিষয়, ছোট ছোট করিয়া, বলাবলি করিতেছিলাম; তখন আমাদের কপোল-যুগল পরস্পর সংলগ্ন ছিল এবং পরস্পরের বাহুযুগল, গাঢ় আলিঙ্গনে ব্যাপৃত ছিল; এই অবস্থায় প্রহরগুলি যে চলিয়া যাইতেছিল, তাহা আমরা জানিতে পারিয়াছিলাম না এবং সেই ভাবেই রাত্রি প্রভাত হইয়া গিয়াছিল। ২৭।

লক্ষ্মণ। এই পঞ্চবটীতে শূর্পণখা।

সীতা। হা আর্য্যপুত্র! এই পর্য্যন্তই দর্শন।

রাম। অয়ি বিয়োগভীতে! এটা চিত্র।

সীতা। যাহা তাহা হউক; দুর্জ্জন, দুঃখ উৎপাদন করে।

রাম। হায়! জনস্থানের বৃত্তান্ত যেন আমার বর্ত্তমান বলিয়া বোধ হইতেছে।

লক্ষ্মণ। হায়! পাপাত্মা রাক্ষসগণ, স্বর্ণ-হরিণের ছল করিয়া তেমন ঘটনাই করিয়াছিল; যাহা পরিশোধ করিলেও দুঃখ জন্মায়। নির্জ্জন জনস্থানে, ইন্দ্রিয় সকল যাহাতে বিকল হইয়াছিল, সেইরূপ আর্য্যের

(রামচন্দ্রের) চরিত্রে পাষাণও যেন রোদন করিয়াছিল এবং বজ্রের হৃদয়ও যেন বিদীর্ণ হইয়াছিল ॥ ২৮ ॥

সীতা। (অশ্রুপাতের সহিত) অগ্নি দেব! রঘুকুলের আনন্দজনক! আমার জন্য আপনি এইরূপই ক্লিষ্ট হইয়াছিলেন।

লক্ষ্মণ। (রামকে দেখিয়া, বিশেষ অভিপ্রায়ের সহিত) আর্য্য! এ কি? * আপনার এই অশ্রুজলসমূহ, ছিন্ন মুক্তামালার ন্যায় ধারারূপে বহির্গত হইয়া, জর্জ্জর অবস্থায় ভূতলে লুণ্ঠিত হইতেছে; এবং শোকাবেগ রুদ্ধ করিলেও, নাসিকা কম্পিত হইতেছে বলিয়া, অন্যের তাহা অনুমিত হয় এবং আপনার হৃদয়, দুঃখে পরিপূর্ণ হইয়াছে (ইহাও বুঝা যায়) ॥ ২৯ ॥

রাম। বৎস! সেই সময়ে প্রিয়জনের (সীতার) বিরহ হইতে উৎপন্ন দুঃখানল, তীব্র হইলেও, প্রতিকার করিবার ইচ্ছায় সহ্য করিয়াছিলাম; কিন্তু এখন হৃদয়ে পরিপক্ব হইয়া তাহা, হৃদয়ের মর্ম্মস্থানে ব্রণের ন্যায় বেদনা জন্মাইতেছে ॥ ৩০ ॥

সীতা। হায়! হায়! আমিও, অত্যন্ত উৎকণ্ঠাবশতঃ আপনাকে যেন আর্য্যপুত্রশূন্য বলিয়া মনে করিতেছি।

লক্ষ্মণ। (স্বগত) হউক; ইঁহাদের দৃষ্টি অন্যদিকে সঞ্চালিত করি। (চিত্র দেখাইয়া প্রকাশ্যে) মন্বন্তরের প্রাচীন, পক্ষিরাজ, মাননীয় এবং পিতৃস্থানীয় জটায়ুর চরিত্র ও পরাক্রমের নিদর্শন এই।

সীতা। হা পিতঃ! আপনার সন্তানস্নেহ সম্পন্ন হইয়াছে।

রাম। হা পিতঃ! কশ্যপবংশীয়! পক্ষিরাজ! আপনার ন্যায় মহাগুণবান্ সাধু ব্যক্তির আর কোথায় উৎপত্তি হইবে?।

লক্ষ্মণ। জনস্থানের পশ্চিমে দনুকবন্ধকর্ত্তৃক অধিষ্ঠিত চিত্রকুঞ্জবান্ নামক এই সেই দণ্ডকারণ্যভূভাগ; ঋষ্যমূকপর্বতে এই সেই মতঙ্গমুনির আশ্রম স্থান; শ্রমণানাম্নী সিদ্ধশবরী এই এবং এই সেই পম্পানামে সরোবর।

সীতা। যেখানে আর্য্যপুত্র, অত্যন্ত অসহিষ্ণুতাবশতঃ মুক্তকণ্ঠে রোদন করিয়াছিলেন।

রাম। দেবি! এই পম্পাসরোবর বড়ই মনোহর।

অশ্রুজলের পতন এবং পুনরায় উৎপত্তি ইহার মধ্যসময়ে এই সরোবরের মধ্য স্থানগুলি দেখিয়াছিলাম, এই স্থানসমূহে বহুতর উৎপল ও পদ্ম ছিল; পদ্মগুলির আবার বৃহৎ দণ্ড সকল প্রকাশ পাইয়াছিল; সেই দণ্ডগুলি আবার মদমত্ত মল্লিকাপক্ষিগণের পক্ষপবনে কম্পিত হইতেছিল॥ ৩১॥

লক্ষ্মণ। এই আর্য্য হনুমান্।

সীতা। চিরদুঃখিত জীবলোকের উদ্ধার করায় গুরুতর উপকারী ও মহাপ্রভাবশালী এই সেই হনুমান্।

রাম। ভাগ্যবশতঃ মহাবাহু ও অঞ্জনার আনন্দবর্দ্ধক এই সেই হনুমান্‌কে দেখিতেছি, যাহার বলে আমরাও কৃতার্থ হইয়াছি, ত্রিভুবনও কৃতার্থ হইয়াছে॥ ৩২॥

সীতা। বৎস! যেখানে পুষ্পিত কদম্ববৃক্ষের উপরে ময়ূরগণ নৃত্য করিতেছে, ইহা কিনামক পর্ব্বত? যাহাতে প্রভাব ও সৌন্দর্য্যমাত্র অবশিষ্ট এবং ধূসরকান্তি আর্য্যপুত্র কিছুকাল মূর্চ্ছিত হইতেছেন, আর তুমি রোদন করিতে করিতে উঁহাকে ধরিয়া রাখিয়াছ; এই অবস্থায় বৃক্ষের তলে আর্য্যপুত্রকে চিত্র করিয়াছে।

লক্ষ্মণ। অর্জ্জুনপুষ্পে সুগন্ধি এই সেই মাল্যবান্ নামে পর্ব্বত; নীল ও স্নিগ্ধ নূতন মেঘ, যাহার শৃঙ্গ আশ্রয় করিতেছে।

রাম। বৎস! এখান হইতেই বিরত হও; ইহার পর আমি দেখিতে সমর্থ হইতেছি না। কারণ, পুনরায় যেন সীতার বিরহ, আমার নিকট ফিরিয়া আসিতেছে॥৩৪॥

লক্ষ্মণ। ইহার পর আপনার এবং মাননীয় বানরগণ ও রাক্ষসগণের

অসংখ্য ক্রমিক আশ্চর্য্য কার্য্যসকল রহিয়াছে; এই আর্য্যা সীতাদেবীও পরিশ্রান্ত হইয়াছেন; সুতরাং নিবেদন করিতেছি যে,ইনি বিশ্রাম করুন।

সীতা। আর্য্যপুত্র! এই চিত্রদর্শনে আমার ইচ্ছা জন্মিয়াছে; তাই কিছু জানাইবার আছে।

রাম। অয়ি! আদেশ কর।

সীতা। বুঝিতেছি; স্নিগ্ধ ও নিস্তব্ধ বনশ্রেণীর ভিতরে আবারও বিচরণ করিব এবং যাহাতে অবগাহনটী পবিত্রতাজনক, পাপনাশক অথচ শীতল; সেই ভগবতী গঙ্গানদীতে আবারও অবগাহন করিব।

রাম। বৎস! লক্ষ্মণ!।

লক্ষ্মণ। এই যে আছি।

রাম। ইহার অভীষ্ট বিষয় অচিরকালমধ্যে সম্পাদন করিবে—এখনই গুরুজনেরা এই খবর দিয়াছেন। অতএব সুখে গমন হইতে পারে এমন একখানি রথ আনয়ন কর।

সীতা। আর্য্যপুত্র! আপনারও কিন্তু সেখানে যাইতে হইবে।

রাম। অয়ি! কঠোরহৃদয়ে! ইহাও কি বলিতে হইবে?

সীতা। তবেই আমার প্রীতিকর বটে।

লক্ষ্মণ। আর্য্য যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেলেন)।

রাম। প্রিয়ে! এই গবাক্ষের নিকটে কিছুকাল আমরা শয়ন করি।

সীতা। ইহাই হউক; পরিশ্রমজনিত নিদ্রা আমাকে আকর্ষণ করিতেছে।

রাম। তবেই, এখানে শয়ন করিবার জন্য আমাকে গাঢ়ভাবে অবলম্বন কর।

ভয় ও পরিশ্রমে ঘর্ম্মবিন্দুসমন্বিত এবং চন্দ্রকিরণস্পৃষ্ট বলিয়া জলস্রাবী চন্দ্রকান্তমণিমালার ন্যায় বিলাসশালী ও আমার যেন জীবনদাতা তোমার বাহু, আমার কণ্ঠদেশে সমর্পণ কর॥ ৩৫॥

(তাহা করাইয়া, আনন্দের সহিত) প্রিয়ে! এ কি!।

তোমার স্পর্শজনিত আমার এই অবস্থা,—কি সুখ, না দুঃখ, মোহ, না নিদ্রা এবং বিষজনিত বিসর্পরোগ, না মত্ততা; ইঁহার কিছুই নিশ্চয় করিতে পারিতেছি না। কারণ, তোমার প্রত্যেক স্পর্শে আমার এমন এক বিকার উৎপন্ন হইতেছে যে, সমস্ত ইন্দ্রিয়ই স্ব স্ব কার্য্যে অক্ষম হইয়া পড়িতেছে; তাহাতে ঐ বিকার আমার অনুভব শক্তিকে অস্থিরও করিতেছে, লুপ্তও করিতেছে। ৩৬॥

সীতা। (হাস্য করিয়া) আমার উপরে আপনার নিশ্চল অনুগ্রহ; সুতরাং ইহা ছাড়া এখন আর কি বলিবেন।

রাম। হে পদ্মনয়নে! তোমার এই মধুর বাক্যগুলি, ম্লান জীবন—পুষ্পের বিকাশজনক, সম্যক্ তৃপ্তিকারক এবং সমস্ত ইন্দ্রিয়ের মোহজনক এবং কর্ণে অমৃতস্বরূপও মনের রসায়নস্বরূপ ॥ ৩৭ ॥

সীতা। প্রিয়ংবদ! আসুন, শয়ন করি। (এই বলিয়া শয়নের জন্য চারিদিকে অন্বেষণ করিতে লাগিলেন)

রাম। কি অন্বেষণ করিতে হইবে?।

বিবাহের সময় হইতে বাল্যকালে গৃহে, তাহার পর আবার যৌবন কালে বনে (তোমার) শয়নের উপকরণস্বরূপ এবং অন্যরমণীকর্তৃক অনাশ্রিত রামের এই বাহুই তোমর উপাধান (বালিস) ॥ ৩৮ ॥

সীতা। (নিদ্রা অভিনয় করতঃ) ইহা আছে, আর্য্যপুত্র! ইহা আছে। (এই বলিয়া শয়ন করিলেন)

রাম। প্রিয়ভাষিণী বক্ষের উপর শয়ন করিলেনই। (দেখিয়া স্নেহের সহিত)

ইনি গৃহে লক্ষ্মী; ইনি নয়নযুগলে অমৃতের তূলী; ইঁহার এই স্পর্শ, শরীরে প্রচুর চন্দনের রস এবং কণ্ঠদেশে এই বাহু, হিমের ন্যায় স্নিগ্ধ মুক্তার হার। সুতরাং ইঁহার কোন্ বস্তু প্রিয়তম নহে; কিন্তু বিরহই কেবল অসহ্য ॥ ৩৯ ॥